DPN 6897

दशकर्म पद्धति DAŚAKARMA PADDHATI

Title :

Run. No. 7622 Cat. No. Micro. No.

Subject Hindu Ritual Religion : Hindu / Bauddha

Language : Skt. / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 8·0×24 Folios 100+16+7+119+3 245 Lines (in a page) 5

Compl. / Incompl. Chapt. / act /

Author / translator

Date: NS / SS / VS / KS

Scribe / donor गोविन्दलाल शर्मा Govinda Lall Sharma.

Ruler / place सुगतदास तुलाधर Sugata Dasa Tuladhar.

Script : New. / Dev. / Bhuj. / Ran. /

Material : palmleaf / paper / thyasaphu /

Condition : fine / damaged by worms, rats, water /

Illus. : Colour paings of Ganesha, Bhairava, Mahalaxmi and Mahakala. (1) Ganesha, Mahadeva, Parbati and Kumara (2)

Beginning, colophon, post-colophon :

१. चूडाकरण (1-22)
श्रीगणेशाय नमः ॥

P.T.O.

2. उपनयन (23 - 49)
3. वेदारम्भ (50 - 68)
4. समावर्तन (69 - 99)

पुस्तकस्थ नेपाली सम्वत् ९११ श्रीसम्वत् १९६४ साके संवत् १८२९ फाल्गुण मासे शुक्लपक्षे अष्टमी भौमवासरे लिखितमिदं गोविन्दलाल शर्मणेन ॥

5. आचार्यवरण (1-2)
6. मातृकापूजा (2-6)
7. आभ्युदयिक श्राद्ध (7-16)
8. यज्ञोपवीत दान (1-1)
9. अष्टमंगल (2-7)
10. विवाह कर्म (1-39)
11. उत्तरविवाह (40-56)
12. विवाह कर्म (57-77)
13. निष्क्रमण (78-79)
14. नामकरण (79-97 / 98)
15. अन्नप्राशन (99-113)
16. चूडाकर्म (113-119)

0 centimeters 5
10
15
20
25
5



काशी, तेलु-कृथियाति उपहार।

0 centimeters 5 10 15 20 25

श्रीगणेशाय नमः॥ अथ चूडाकरणं॥ ॥तत्र तृतीयावर्षे पुण्यदिने पितावा
हिः शालायां प्राङ्मुखः उपविष्टः मातृकापूजाभ्युदयिके कृत्वा कुशाग्रैः
कां कुर्यात् तत्र क्रमः॥ अभ्युक्षणादिकर्म कर्तुं कुशप्रच्छादितमुदक
मानेतव्यं तत्रोत्तरपुरोदेशः समो वा परिशोध्यः॥ कुशैर्हस्तमात्रं परि
समुह्य गोमयोदकेनोपलिप्य अग्निस्थापनपर्यन्तं वामहस्तं भूमा

मन्त्रार्थ सुगत दाशा संकलन
भाषा सहु-कविधान उकेहार

चूडा
१

वारोप्य दक्षिणजानुं भूमावेव पातयित्वा फलपुष्पकुशानामंस
नमंगृहीत्वा रेषापश्चकं कुर्यात् ॥ ततः प्रथमं पूर्वाया द्वादशाङ्गुल
प्रमाणं पृथिवीदेवताकाध्येयं पीतवर्णा लेखा लिखितव्या ॥ त
ल्लेखा पश्चिमभागसंलग्ना उभयाया एकविंशत्यङ्गुल प्रमाणा अ
ग्निदेवताकाध्येयं लोहितवर्णा लेखा लिखितव्या ॥ तल्लेखा संलग्ना

राम.

पूर्वायलेखातः षडङ्गुलाभराला पूर्वगामिनी प्रदेशप्रमाणं प्रजापति
देवताकाध्येयं कृष्णवर्णा लेखा लिखितव्या ॥ तस्याश्चापि षडङ्गुलाभ
राला पूर्वगामिनी प्रादेशप्रमाणं इंद्रदेवताकाध्येयं नीलवर्णा
लेखा लिखितव्या ॥ तस्याश्चापि षडङ्गुलाभराला पूर्वगामिनी द्वादशा
ङ्गुलप्रमाणं सोमदेवताकाध्येयं शुक्लवर्णा लेखा लिखितव्या ॥ ए

चूडा
२

वंलेखापञ्चकं कृत्वा॥ ॥अनामिकाङ्गुष्ठाभ्यां ताभ्यां एवमङ्गुस्व
निन्वा ऐशान्यां क्षिपेत्॥ ततो नलेन लेखाभ्युक्षणं कृत्वा सन्निधा
पितकांस्यभाजनस्थेग्नौ ज्वलन्तृणं निरस्यन्त्येन॥ प्रजापतिऋषि
स्त्रिष्टुप्छन्दोऽग्निर्देवता अग्निसंस्कारे विनियोगः॥ ॐ कव्यादमग्निं
प्रहिनोमि दूरं यमराज्यं गच्छतु रिप्रवाहः॥ ततोग्निं प्रणयेदनेन॥ १

राम.

प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता अग्निस्थापने विनियोगः
॥ॐ भूर्भुवः स्वः ईत्यभिमुखमग्निं प्रणयेत्॥ ततो वामहस्तं जानुनोत्था
प्य॥ अञ्जलिं बध्वा॥ ॐ ईडे त्वायमिनरो जातवेदादेवेभ्यो हव्यं वहतु
प्रजा ईत्यग्नेरुपस्थानं॥ ततः पातितदक्षिणजानुः॥ प्रादेशमि
तां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥ ततो ब्रह्मवरणं॥ ततो यजमा

चूडा.
३

ग्निं परिक्रम्याग्नेईक्षिणतऊर्द्ध जानुः प्रत्यङ्मुखस्तिष्ठन् ब्रह्मासने
प्राङ्मुखीम्बारिधारां दत्वा तस्योपरि प्रागग्रान् कुशान् नास्तीर्य्य
प्रत्यङ्मुखस्तिष्ठन् वामहस्तानामिकाङ्गुष्ठाभ्यां ब्रह्मासनादर्भमेकं
गृहीत्वा नेत्रे स्पृष्ट्वा क्षिपेदनेन ॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देव
ता ब्रह्मासनानुरणनिरसने विनियोगः ॥ ॐ निरस्तः परावसुः इति

राम.

निरणं निरस्य ॥ ततः उदकमुपस्पृश्य ॥ ब्रह्मणमुपवेशयेदनेन ॥
प्रजापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवता ब्रह्मोपवेशने विनियोगः
॥ ॐ श्यावसोः सदने सीद इति पूर्वोक्तान्यतमं ब्रह्माणमुपवेशयेत् ॥
ब्राह्मणस्य क्षेत्रराणां प्रतिवचनादिकं सूक्ष्मं ॥ ततो ब्रह्मोपरि प्रागग्रान्
कुशान् नास्तीर्य्य ॥ जलेनाभ्युक्ष्य ब्रह्माणं स्पृष्ट्वा जपेत् ॥ प्रजापतिऋ

धूडा.

षिर्गायत्री छन्दोविष्णुर्देवता जपे विनियोगः॥ ॐ ईदं विष्णुर्विचक्र
मे त्रेधा निदधे पदं॥ समूढमस्य पांसुले॥ ईति जप्त्वा तेनैव पथा
परावृत्य स्वस्थानं गच्छेत्॥ ततः उपविश्य॥ ततो दक्षिणजानुं पातई
त्वा उपरि कृतदक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भू
मिजपं कुर्यात्॥ परमेष्ठी ऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिज

राम.

पविनियोगः॥ ॐ ईदं भूमे भौजाम हईदं भई सुमङ्गलं॥ परासपत्ना
बाधस्वास्मे धां निदधे धनं॥ रात्रौ वह्नि शब्दमुच्चारयेत्॥ ततो जानू
त्थाप्य दक्षिणहस्तेन कुशत्रयं गृहीत्वा अग्रे कृत्वा दितः प्रदक्षिण
क्रमेण प्रतिऋचं परिसमूहयेत्॥ कौत्सऋषिर्जगती छन्दोऽग्निर्देव
ता पञ्चस्य षडहस्य षष्ठे अहन्यग्निमारुतेशा ते परिसमूहने विनियो

गः॥ ॐ ईमंसोममहंतेजातवेदसेरथमिवसम्महेमामनीषया॥ भद्रा
हिनः प्रमतिरस्यसंसद्यग्नेसख्येमारिषामावयन्तव ईत्यग्नेरुभरतः॥ ॐ
भद्रामेधांकृणवामाहवींषितेचितयन्तःपर्वणापर्वणावयं॥ जीवान
वेपतरांसाधयाधियोग्नेसख्येमारिषामावयन्तव ईतिपूर्वेनः॥ ॐ इ
केमत्वासमिधंसाधयाधियोत्वेदेवाहविरदन्त्याहुतं॥ त्वमादित्यांश्चा

वहतोह्युग्रस्यग्नेसख्येमारिषामावयन्तव ईतिदक्षिणतः॥ परिसमुह्य
वर्हीभिरयेमूलान्याछादयन्त्रिरावृत्तंपश्चात्तंवापुरस्ताद्दक्षिण
तः॥ उत्तरतःपश्चात्तरणंकुर्यात्॥ तत्पूर्वोक्तान्खादिरादीन्वि
शतीध्मान्मूलमध्यायक्रमेणघृताक्तान्प्रादेशाद्यपरिमितान्प्रजा
पतिंमनसाध्यात्वातूष्णीमग्नौजुहुयात्॥ ततस्तूष्णींदेववर्हिषःसाग्रकु

शपत्रद्वयं गृहीत्वा प्रादेशमात्रं कृत्वा कुशमन्तर्द्धायद्विधादनेन ॥ प्रजा
पतिऋषिः पवित्रे देवते पवित्रछेदने विनियोगः ॥ ॐ पवित्रस्थो वैष्णव्यौ
ततो द्विरनुमृज्यादनेन ॥ प्रजापतिऋषिः पवित्रे देवते पवित्रसंमार्ज
ने विनियोगः ॥ ॐ विष्णोर्मनसा पूतेस्थः ॥ इति संमृज्याज्यस्थाल्या मुद्
गग्रे पवित्रे निधायाज्यमावपेत् ॥ ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां

गृहीतपवित्राभ्यामाज्यमूर्द्धं नीत्वा सकृत्क्षिपेदनेन ॥ प्रजापतिऋषि
राज्यदेवता आज्योत्पवने विनियोगः ॥ ॐ देवस्त्वा सवितोत्पुनात्वच्छि
द्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः स्वाहा ततो द्विस्तूष्णीं ततः प
वित्रे जलेनाभ्युक्ष्य तूष्णीमग्नौ क्षिपेत् ॥ ततः आज्यपात्रमुदकेनाभ्यु
क्ष्याग्नेरुत्तरतो दारुत्रयमवतारयेत् ॥ इत्याज्यसंस्कारः ॥

चूडा-

एवं कृत्वा संस्कारोपि ॥ ॥ ततः सम्यग्नाग्निमग्रौ तिलतण्डुलमुद्ग
साधितं स्थालीपाकं पचेत् सते चरौ तमवतार्य्य एकविंशतिदर्भपि
जलिः सप्त सप्तत्रिधा वद्धाः उष्णोदकपूर्णकांस्यपात्रं ताम्रक्षुरं श्राद
र्द्धीम्बा क्षुरहस्तं नापितश्च अग्नेर्दक्षिणतः स्थापयेत् आँदुहं गोम
यं स्थालीपाकं चोत्तरतोग्नेः स्थापयेत् ॥ ततो व्रीहियवतिलमाषैः प्रत्ये

न

राम-

त्या

कं पात्राणि पूरयित्वा व्रीहियवाभ्यां तिलमाषाभ्यां मिलिताभ्यां च
पात्रद्वयं पूरयित्वा उभयतः श्वारग्नेः पुरतः स्थापयेत् ॥ ॥ अथ कर्ण
वेधः ॥ तत्र तृतीयवर्षे पंचमे वा पुष्ये दुविष्णा चित्रा हरिरेवत्यं न्यतम
नक्षत्रे शुभतिथौ पूर्वाह्णे पितान्यो वा पूर्वाभिमुखो पविष्टः कुमारस्य
दक्षिणकर्णे भिः शृणु यामदेवाभद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरै
रंगैस्तुष्टुवांसस्तनूभिः ॥ ॐ भद्रं क १

चूडा
८

रङ्गै सुषुवांसल नूमिर्व्यो महिदेवहितं मदापु ॥ ईतिनतो वामक
र्णमभिमंत्रयति ॐ वक्षं निवेदागनीगन्नि कर्णे प्रियं सखायं परिष
स्वजाना ॥ पोषेवशिं केवितनाधिधन्वंज्पाइयं समनेपारयंती ॥ ई
तिमंत्रेण ॥ ततो मध्यं निरीक्ष्य नापितद्वारावेधयेत् ॥ तस्मिन्नेवाव
सरे मधुरादिदानमाचारात् ॥ ततो ब्राह्मणभोजनं ॥ ईतिकर्णवेध. राम.

ततो भूगतदक्षिणजानुः उदकस्थालीमयेकृत्य अग्निः पर्युक्षणं
कुर्यात् ॥ प्रजापतिऋषिरदिति ईवतोदकाञ्जलिप्रसेचने विनि
योगः ॥ ॐ अदितेअनुमन्यस्व इत्यग्नेर्दक्षिणतः पूर्वायामञ्जलि
धारादद्यात् ॥ प्रजापतिऋषिरनुमतिर्ईवतोदकाञ्जलिप्रसेचने
विनियोगः ॥ ॐ अनुमतेअनुमन्यस्व इत्यग्नेः पश्चादुत्तरायां ॥ प्रजाप

नि ऋषिः सरस्वती देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ सरस्व
त्यनुमन्यस्व इत्यग्नेरुत्तरतः पूर्वाग्रामञ्जलिधारां दद्यात्॥ प्रजापति
ऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनियोगः॥ ॐ देव
सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय॥ दिव्यो गन्धर्वः केतपूः केतं नः पुनातु
वाचस्पतिर्वाचं नः स्वदतु इति होमी पडयं सहितस्याग्नेर्विपरीतवा

प्रसुव यज्ञं २

रिधारयावेष्टनं कुर्यात्॥ ततो गाढुत्थाप्य समिधमेकां कुशपुष्प-
फलसहितां गृहीत्वा उपरि कृतदक्षिणहस्तो विरूपाक्षं जपेत्॥ प
रमेष्ठी ऋषिर्निगदछन्दः कालाग्निरुद्ररूपोग्निर्देवता विरूपाक्ष
जपे विनियोगः॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च
त्यागश्च धृतिश्च धर्मश्च सत्यं च वाङ्मनश्चात्मा च ब्रह्मचर्य-ता

चूडा-
१०

निप्रपद्ये-नानिमामवतु-ॐभूर्भुवःस्वरोँमहान्महात्मानंप्रपद्ये-विष्णु
पाक्षोसिदनांजिस्तस्पने-शय्यापरोगृहान्नरिक्षे-विमितंहिरण्मयं
तेहवानोहृदयान्पयस्मये-कुक्षेअन्नःसन्निहितानि-नानिवल-भद्र
वलसाचरक्षतोप्रमनो-अनिमिषनू-तत्सत्यंयत्नेद्वादशापुचाहत्वा
सम्वत्सरे-सम्वत्सरेकामप्रेणयज्ञेनयाजयित्वा-पुनर्ब्रह्मचर्य्यमु-

राम-

पयन्ति त्वं-देवेषुब्राह्मणेस्पृह-मनुष्येषुब्राह्मणेवैब्राह्मणमुष
धावत्पुपत्वाधावामिजपन्नं-मामाप्रतिजापिजुहूनं-मामाप्रतिहो
सि-कुर्वन्नं-मामाप्रतिकार्षीस्त्वांप्रपद्ये-त्वयाप्रसूतइदंकर्म्मकरि
ष्यामि-तन्मेराध्यतां-तन्मेसमृध्यतां-तन्मेउपपद्यतां-समुद्रोमावि-
श्वव्यचा-ब्रह्मानुजानातु-तथोमाविश्वेदाब्रह्मणःपुत्रोनुजानातुश्रा

कूडा-
११

नो माप्रेचेता मैत्रावरुणानुजानातु-तस्मै विहृपाक्षायदभ्राजयेस
मुद्राय विश्वव्यचसे नुथाय-विश्ववेदसेश्वानाय प्रचेतसे सहस्राक्षाय-
ब्रह्मणा-पुत्राय नमः॥ इति मंत्रेण कुशमेशान्यां त्यक्त्वा-फलपुष्पी
ब्रह्मणे निवेद्य-पातितदक्षिणाजानुः॥ घृताक्तांसमिधं तूष्णीं मग्नो
क्षिपेत्॥ ततस्तस्य संस्कृतस्य नाम्नोग्नेः पश्चादवस्थाप-व्याहृति

राम-

होमं कुर्य्यात्॥ ॥प्रजापतिऋषिर्गायत्रीछन्दोग्निर्देवता व्याहृतिहो
मे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णिक्छन्दोवायुर्देवता
व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दःसू
र्य्योदेवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्बृ
हतीछन्दोबृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥ ॐ भूर्भुवः

चूडा-
१२

स्वः स्वाहा॥ ततो माता शुचि नावस्त्रिया कुमारमाछाद्य अग्नेः पश्चादुत्तरा
ग्रेषु कुशेषु प्राङ्मुखी उपविशेत्॥ चूडाकरणकर्तृतस्याः पश्चादू
र्द्ध्वस्थितः प्राङ्मुखः सन् सवितारं मनसा ध्यायन् क्षुरहस्तं नापितं प्रे
क्षमाणो जपेत्॥ प्रजापतिऋषिः सविता देवता चूडाकरणे क्षुरहस्त
नापितप्रेक्षणे विनियोगः॥ ॐ श्वापदमगात्स्वितः क्षुरेण ततो वापं

राम-

ध्यायन् उष्णोदकपूर्णकांस्यपात्रं प्रेक्षमाणो जपति॥ प्रजापतिऋ
षिर्वायुर्देवता चूडाकरणे उष्णोदककांस्यप्रेक्षणे विनियोगः॥ ॐ
उष्णेन वाय उदकेनैधि ततः उष्णोदककांस्यात् दक्षिणेन पाणिना
उष्णोदकमादाय दक्षिणां जुटिकां सिंचेदनेन॥ प्रजापतिऋषि
रापो देवता चूडाकर्मणि जुटिकासेके विनियोगः॥ ॐ श्वापदं

चूडा-
१३

दनुजीवसे॥ तत स्त्रायक्षुरं प्रेक्षमाणो जपति॥ प्रजापतिऋषिः क्षु
रो देवता चूडाकर्म्मणि नाम्नक्षुरप्रेक्षणे विनियोगः॥ ॐ विलोई
ष्ठोसि तनः पूर्व्वोपकल्पिताः सप्तदर्भपिञ्जलिं गृहीत्वा उर्द्ध्वमू
लाः दक्षिणजुटिकायां निदधाति॥ प्रजापतिऋषिरोषधीदेवता
चूडाकर्म्मणि स्त्रिशिरोग्रदर्भपिञ्जलीनिधाने विनियोगः॥ ॐ

राम-

या

ओषधे त्रायस्वैनं तनोदर्भपिञ्जलीभिः सहितां जुटिकां वामहस्तेन गृ
हीत्वा उर्द्ध्वमूलां जुटिकां निदधाति॥ प्रजापतिऋषिः स्वधितिर्देवता चू
डाकर्म्मणि जुटिकायां क्षुरनिधाने विनियोगः॥ ॐ स्वधिते मैनं हिंसीः
ततः क्षुरं केशछेदमकुर्व्वन् सकृत् प्राङ्मुखं प्रेरयेदनेन॥ प्रजापति ऋ
षिः पूषा देवता चूडाकर्म्मणि कपुञ्जिकायां क्षुरप्रेरणे विनियोगः॥ ॐ

चूडा-
१४

येनपूषा बृहस्पतेर्वीर्यो रिन्द्रस्य वीर्यम्॥ तेनते वपामि ब्रह्मणा जी
वातवे जीवनाय दीर्घायुत्वाय बलाय वर्चसे इति सकृत्॥ ततो द्विस्त्रि
श्चोप्रेरयेत्॥ ततो लौहक्षुरेण जुटिकां छित्वा सहदर्भपिंजलीभिः स
हितां तस्मिन्नेव पूर्वस्थापिते आनडुहोमये स्थापयेत्॥ ॥
एतदनन्तरं कूर्काटिकोपरि बद्ध जुटिकायां कपुच्छलाभिधानायां-

राम-

सिंचनादि पूर्ववत्कुर्यात्॥ प्रजापतिऋषिरापोदेवता चूडाकर्मणि
कपुच्छलक्लेदने विनियोगः॥ ॐ आपउंदन्नुजीवसे॥ ततस्ताम्रक्षुरेण
क्षमारणे जपति॥ प्रजापतिऋषिः क्षुरोदेवता चूडाकर्मणि ताम्रक्षुर
प्रेक्षणे विनियोगः॥ ॐ विल्लो ईं ष्टो सि ततः सप्तदर्भपिंजलीगृहीत्वा
ऊर्ध्वमूलाः कपुच्छले निदधाति॥ प्रजापतिऋषिरापोदेव

चूडा-
१५

ता चूडाकर्म्मणि अभिशिरो यदर्भपिञ्जलीनिधाने विनियोगः॥ ॐ
ओषधे त्रायस्वैनं नतो दर्भपिञ्जलीभिः सहितां जुटिकां वामहस्तेन गृही
त्वा दक्षिणहस्तेन ताम्रक्षुरं कपुच्छे निदधाति॥ प्रजापतिऋषिः स्व
धितिर्देवता चूडाकर्म्मणि कपुच्छे क्षुरनिधाने विनियोगः॥ ॐ स्वधि
तेमैनं हिंसीः नतस्ताम्रक्षुरं केशच्छेदमकुर्वन् सकृत् प्राङ्मुखं प्रेरयेद

राम-

नेन॥ प्रजापतिऋषिः पूषादेवता चूडाकर्म्मणि कपुच्छे क्षुरप्रेरणे
विनियोगः॥ ॐ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्॥ तेन तेवपा
मि ब्रह्मणा जीवातवे जीवनाय दीर्घायुत्वाय बलाय वर्चसे॥ ततो द्वि
तूष्णीं प्रेरयेत्॥ ततो लोहक्षुरेण कपुच्छं छित्वा सहदर्भपिञ्जलीभिः
सहितां तस्मिन्नेव गोमये स्थापयेत्॥ ततः उत्तरजुटिकायां कपुच्छि

चूडा-
१६

कापांमिधानायां पुनः सिंचनादि पूर्ववत् कुर्यात् ॥ प्रजापतिऋषिरा
पोदेवता चूडाकर्म्मणि कपुष्पिकाक्लेदने विनियोगः ॥ ॐ आपउंदमु
जीवसे ॥ ततस्ताम्रक्षुरं प्रेक्ष मारणो जपति ॥ प्रजापतिऋषिः क्षुरोदेवता चू
डाकर्म्मणि ताम्रक्षुरप्रेक्षणे विनियोगः ॥ ॐ विष्णो र्द्दंष्ट्रोसि ततः सप्त
दर्भपिञ्जलीगृहीत्वा ऊर्द्ध्वमूला तत्र जुष्टिकायां निदधाति ॥ प्रजापति

रामं-

ऋषिरोषधयोदेवता चूडाकर्म्मणि अभिशिरोग्रदर्भपिञ्जलीनिधाने वि
नियोगः ॥ ॐ ओषधे त्रायस्वैनं ततो दर्भपिञ्जलीभिः सहितां जुष्टिकां वाम
हस्तेन गृहीत्वा दक्षिणहस्तेन ताम्रक्षुरं कपुष्पिकायां निदधाति ॥ प्रजा
पतिऋषिः स्वधितिर्द्देवता कर्म्मणि कपुष्पिकायां क्षुरनिधाने विनियोगः ॥ ॐ
स्वधिते मैनं हिंसीः ततस्ताम्रक्षुरं केशछेदनकुर्द्दन्सकृत् प्राङ्मुखं प्रेरयेदनेनः

चूडा

15
10
5
0 centimeters 5 10 15 20

चूडा-
७

॥प्रजापतिऋषिःपूषादेवता चूडाकर्म्मणि कपुञ्जिकायां क्षुरप्रेरणे विनियोगः
॥ॐ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्॥ तेन ते वपामि ब्रह्मणा जीवान
वे जीवनाय दीर्घायुष्ट्वाय वर्चसे॥ ततो द्विस्तूष्णीं प्रेरयेत्॥ ततो लौ
हक्षुरेण कपुञ्जिकां छित्वा सहदर्भपिञ्जलीभिः सहितां तस्मिन्नेवानड्
होमग्नेः स्थापयेत्॥ ॥ततः पाणिभ्यां कुमारस्य मूर्द्धानं परिगृह्य जपेत्॥

राम-

प्रजापतिऋषिर्बृहस्पतिरुद्रो जामदग्न्यादयो देवता कुमारस्य मूर्द्धानं शिर
परिगृह्य जपे विनियोगः॥ ॐ आयुषं जामदग्नेः॥ कश्यपस्य आयुषं॥ श्रग
स्त्यस्य आयुषं॥ यद्देवानां आयुषं॥ तन्नः अस्तु आयुषं॥ ॥ततो ग्नेरुत्तर
तः कुमारं नीत्वा पथाकुलं तस्य कुमारस्य चूडां कारयेत्॥ ॥ततः उप
विश्य॥ ततो व्याहृतिहोमं कुर्य्यात्॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता

चूडा.
१८

व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिर्गायत्रीछन्दो वायु
र्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः
सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्बृह
तीछन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥ ॐ भूर्भुवः स्वः स्वा
हा॥ ॥ अथ यदि शाण्डिल्यायनहोमः क्रियते तदा पङ्क्तिशेषमन्वेष्टव्यः

राम.

॥ ततः प्रादेशमितां समिधं घृताक्तां स्रुक्स्रुवाभ्यामग्नौ क्षिपेत्॥ ततः पुनर्भूमौ गत्वा द
क्षिणजानुः उदकस्थाल्यामग्नेः कृत्वा अग्निः पर्युक्षणादिकं कुर्यात्॥ प्रजा
पतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनियोगः॥ ॐ देवस
वितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु
वाचस्पतिर्वाचं नः स्वदतु इति होमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधा

चूडा.
१९

रयावेष्टनं ॥ प्रजापति ऋषिरदिति र्देवतोदकाञ्जलि प्रसेचने विनियोगः
॥ ॐ अदितेऽनुमंस्थाः इत्यग्ने र्दक्षिणतः पूर्वाग्रां ॥ प्रजापति ऋषिरनुमति
र्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अनुमतेऽन्वमंस्थाः इति पश्चा
दुत्तराग्रां ॥ प्रजापति ऋषिः सरस्वती देवतोदकाञ्जलि प्रसेचने विनियोगः ॥
ॐ सरस्वत्यनुमंस्थाः इत्युत्तरतः पूर्वाग्रां - इति पूर्वविपरीतामञ्जलिधारा द

राम.

ध्यात् ॥ तत्तल्लरणक्रमेणबर्हिरुत्थाप्य जुहि कांवध्वा वामहस्ते कृत्वा ॥ प्रजाप
तिऋषिर्ब्रह्मो र्देवता दर्भतृणाभ्यञ्जने विनियोगः ॥ ॐ अक्रुं विहा नाव्य
नुवयः इति मूलमध्याग्रक्रमेणाज्येनाभ्यनक्ति ततो जलेनाभ्युक्षाग्रोक्षि
पेदनेन ॥ प्रजापति ऋषिरनुष्टुप् छन्दो रुद्रो देवता दर्भजुहिकाहोमे विनि
योगः ॥ ॐ यः पशूनामधिपति रुद्रस्तन्निचरो वृषा पशूनस्माकं माहिंसीरे

चूडा.
२०

तदस्तु हुतभव स्वाहा॥ ततः उत्थाय कुमारः दक्षिणहस्तस्य स्फ्येन फल
पुष्प घृत पूर्णेन पूर्णाहुतिं दद्यात् तेन॥ प्रजापतिऋषिर्विराट् छन्दः इन्द्रो
देवता पशुकामस्य पशुजनी पशुप्रयोगे विनियोगः॥ ॐ पूर्णे होमं पशुभ्यो जु
होमि यो मे जुहोति वरं मे मे ददाति॥ वरं वृणे पशुभ्यो भूमिलोकेस्वा
हा ततः ॐ वसुभ्यः स्वाहा इत्यभिषिञ्चामाज्यधारां दद्यात्॥ ततो ब्रह्मद राम

क्षिणं॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ श्रद्धाकृतेन चूडाकरणहोमक
र्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजाप
तिदैवतं ब्रह्मणे दक्षिणां नमः॥ ॥ ततोग्निप्रदक्षिणक्रमेण हस्तनी
त्वा ब्रह्मोत्थापनं ग्रन्थिविमोकौ वा॥ ततः स्फ्येन भस्मानीय आयुषकर
णं॥ ॐ आयुर्वै जमदग्नेरिति हृदि॥ ॐ कश्यपस्य आयुष इति दक्षि

चूडा.
२१

णवाहुमूले ॥ ॐ अगस्त्यस्य त्र्यायुषमिति वामवाहुमूले ॥ ॐ यद्देवानां
त्र्यायुषमिति कण्ठे ॥ ॐ तन्नो अस्तु त्र्यायुषमिति शिरसि विंदुं कुर्यात् ॥
एवं कुमारपक्षे ॥ तत्र तन्नो इत्यस्य स्थाने तन्ते इति विशेषः ॥ ततः पात्रस्थं
जलमपनीय पात्रं जलान्तरेण पूर्य्य तत्र कुसुमं प्रक्षिप्य ॥ दक्षिणादा
नं ॥ कुशत्रयाक्षतजलान्यादाय ॥ ॐ अद्य कृतैतच्चूडाकरण होमकर्म्म

राम.

प्रतिष्ठार्थं गामेकां रुद्रदैवतां यथानाम गोत्राय ब्राह्मणाय दक्षिणा
दानमहं सम्प्रदे ॥ यथाशक्ति स्वर्णं वा ॥ ततः पूर्ववद्वामदेव्यगानं
॥ ततः कृशरस्थालीपाकमासादितव्रीहियवादिकञ्च नापिताय प्रति
पादयेत् ॥ ततः आचारात् सकेशमानडुहगोमयं सपद्मिनीकेजले क्षि
पेत् ॥ ॥ इति चूडाकरणकर्म्म समाप्तं शुभम् ॥ ॥

चूडा·
२२

राम:

श्रीगणेशाय नम॥ अथोपनयनं॥ तत्र आचार्य्यवर्णपक्षे॥ ॐ अद्य अमुक
मासीय अमुकपक्षीय अमुकतिथौ· अमुकगोत्र ममुकशर्म्मा गंधाक्षता:
मेभि: पुष्पचन्दनताम्बूलवासोभिरात्मानमुपनयनायिनु मा आचार्य्यत्वेनत्वा
महं वृणे॥ ॐ वृतोस्मीति प्रतिवचनं· ॐ यथाविहितं कर्म कुरु· ॐ क
रवाणीति प्रतिवचनं॥ ॥ तत्र गर्भाष्टमेऽष्टमे वा वर्षे· अनुकल्पे·

उप.
२३

षोडशवर्षाभ्यन्तरे उपनयनदिने प्रातरेव ब्राह्मणत्रयसहितस्य मा
नवकस्य भोजनं मानवकभोजनञ्च किञ्चिद्दुग्धपानामेकमेव॥
ततो मुण्डनं॥ ततः स्नानं॥ ततः कुण्डलादिना यथाशक्त्यलंकरणं॥
ततो नूतनैकवस्त्रपरिधानं॥ ततः आचार्य्यो मातृकापूजाभ्युदयिके
कृत्वा पुरस्तात् बहिःशालायां प्राङ्मुख उपविष्टः गोमयोपलिप्तप्रदेशे

राम.

कुशाण्डिकां कुर्य्यात् तत्र क्रमः॥ अभ्युक्षणादिकर्म्म कर्त्तुं कुशप्रछादि
तमुदकमानेतव्यं कुशैर्हस्तमात्रं पूर्व्वोत्तरायतं समम्वा देशे परिसमुह्य
गोमयोदकेनोपलिप्य अग्निस्थापनपर्य्यन्तं वामहस्तं भूमावारोप्य
दक्षिणजानुं भूमावेव पातयित्वा फलपुष्पकुशानामन्यतमं गृही
त्वा रेषापञ्चकं कुर्य्यात्॥ तत्र प्रथमं पूर्व्वाया द्वादशाङ्गुलप्रमाण

उप.
२४

पृथ्वीदेवताकाध्येय· पीतवर्णे लेखालिखितव्या ॥ तल्लेखा पश्चिम
भागसंलग्ना· उत्तराग्रा· एकविंशत्यङ्गुलप्रमाणा· अग्निदेवताका
ध्येय· लोहितवर्णे लेखालिखितव्या ॥ तल्लेखा संलग्ना पूर्वाग्रलेखा
तः षडङ्गुला चतुरला पूर्वगामिनी प्रादेशप्रमाणा· प्रजापतिदेव
ताकाध्येय· कृष्णवर्णे लेखालिखितव्या ॥ तस्या अपि षडङ्गुला चतु

रम·

ला· पूर्वगामिनी प्रादेशप्रमाणा· ईशदेवताकाध्येय· नीलवर्णे लेखालि
खितव्या ॥ तस्या अपि षडङ्गुला चतुरला पूर्वगामिनी· द्वादशाङ्गुल प्र
माणा· सोमदेवताकाध्येय· शुक्लवर्णे लेखालिखितव्या ॥ एवंले
खापंचकं कृत्वा ॥ अनामिकाङ्गुष्ठाभ्यां· नाभ्यएव मृदः खनित्वा·
ऐशान्यामरत्निमात्रे देशे क्षिपेत् ॥ ततो जलेन लेखा अभ्युक्षणं कृत्वा· ॥

उप.
२५

ततः सन्निधापितकांस्यभाजनस्थेग्नौ ज्वलन्तृणं निरस्यत्येन ॥ प्र
जापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवता अग्निसंस्कारे विनियोगः ॥ ॐ
कव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ॥ ततोग्निं प्राण
येदनेन ॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता अग्निस्थापने
विनियोगः ॥ ॐ भूर्भुवः स्वः इत्यग्निमुखमग्निं प्राणयेत् ॥ ततो वामहस्त

ग्रम.

ग्रम जानुचोत्थाप्य ॥ अंजलिं बध्वा ॥ ॐ इहैवाग्न इतरो जातवेदा देवेभ्यो
हव्यं वहतु प्रजानन् इत्यग्नेरुपस्थानं ॥ ततः पातितदक्षिणजानुः पादे
शमित्तां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततो ब्रह्मावरणं ॥ ॐ
अद्य कर्तव्योपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म
कर्तुं त्वं मे ब्रह्मा भव इति ब्रह्माणं वृणुयात् ॥ ततो यज्ञाग्निं परिक्र

उप.
२६

म्याग्नेर्दक्षिणतऊर्द्ध्वजानुः प्रत्यङ्मुखस्तिष्ठन् ब्रह्मासने प्राङ्मुखो
ऽवारिधारां दत्वा तस्योपरि प्राग्ग्रान् कुशान् नास्तीर्य प्रत्यङ्मुखस्ति
ष्ठन् वामहस्तानामिकाङ्गुष्ठाभ्यां ब्रह्मासनादर्भमेकं गृहीत्वा नै
ऋत्यां क्षिपेदनेन ॥ प्रजापतिऋषिर्गायत्री छन्दोऽग्निर्देवता ब्रह्मास
नान्तरणनिरसने विनियोगः ॥ ॐ निरस्तः परावसुः इति तृणं निरस्य ॥ ततः

राम.

उदकमुपस्पृश्य ॥ ब्रह्मासनमुपवेशयेदनेन ॥ प्रजापतिऋषिस्त्रिष्टुप्
छन्दोऽग्निर्देवता ब्रह्मस्थापने विनियोगः ॥ ॐ आवसोः सदने सीद इ
ति छत्रा द्यन्यतमं ब्रह्मासनमुपवेशयेत् ततो ब्रह्मोपरि प्राग्ग्रकुश
नास्तीर्य जलेनाभ्युक्ष्य ब्रह्मानस्पृष्टा जपेत् ॥ प्रजापतिऋषिर्गा
यत्री छन्दो विष्णुर्देवता जपे विनियोगः ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा

उप.
२

निदधेपदं। समूढमस्य पांसुले। इति जघ्रातेनैव पथा परा परावत्पत्व
स्थानं गच्छेत्॥ ब्राह्मणपक्षेतु वरणप्रतिबन्धनादिकं सूक्ष्मं॥ ततः उ
पविश्य॥ दक्षिणजानुं पातयित्वा उपरि कृतदक्षिणहस्तः करद्वय
मधोमुखं भूमावारोप्य भूमिजपं कुर्यात्॥ परमेष्ठी ऋषिरनुष्टु
प्छन्दोग्निर्देवता भूमिजपे विनियोगः॥ ॐ इदं भूमेर्भजामहे इदं भ

राम.

इंसुमङ्गलं॥ परसपत्नान्बाधस्वान्येषां विन्देधनं॥ ततो वसुशब्दप्र
योगः॥ ततो जानुत्थाप्य दक्षिणहस्ते नकुशत्रयं गृहीत्वा अग्नेरुत्तरा
दितः प्रदक्षिणक्रमेण प्रतिस्रचं परिसमूहयेत्॥ कोन्वस्य ऋषिर्जग
तीछन्दोग्निर्देवता पवस्य षडहस्य षष्ठे अहन्यग्निमारुतेशस्त्रप
रिसमूहने विनियोगः॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम

उप.
२८

म्हे मामनीषया ॥ भ्रड्डाहि नः प्रमतिरस्य संसद्यग्ने सख्ये मारिषा
मावयक्षत्र इत्यग्ने हुतरतः ॥ ॐ भ राग्ने ध्रुं कृणवा मा हवींषि नेचि
तय नः पर्वणा पर्वणा वयं ॥ जीवातवे प्रतरां साधया धियोग्ने सख्ये
मारिषा मावयक्षत्र इति पूर्वतः सौसके मत्वा समिधं साधयाधिय
त्ते देवा हविरदन्त्वाहुतं ॥ त्वमादित्यां आवहतां हुस्मस्यग्ने सख्ये

राम.

मारिषा मावयक्षत्र इति दक्षिणतः ॥ परिसमूह्य बर्हिभिरग्नेर्मूला
न्याछादयन् शिरावृतं पञ्चावृतं वा पुरस्ता दक्षिणतः उत्तरतः प
श्चात् स्तरणं कुर्यात् ॥ ततः पूर्वोक्तान् खादिरादीन् विंशति आनू
मूलमध्याग्रक्रमेण घृताक्तान् प्रादेशद्वयपरिमितान् प्रजापतिं
मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात् ॥ तत स्तूतादेव बर्हिषः सायकु

उप.
२९

शपत्रद्वयं गृहीत्वा प्रादेशमात्रं कृत्वा कुशमन्तर्द्धाय छिद्रं घादनेन॥
प्रजापतिऋषिः पवित्रदेवते पवित्रछेदने विनियोगः॥ ॐ पवित्रस्थो
वैष्णव्यौ ततो द्विरनुमृज्यादनेन॥ प्रजापतिऋषिः पवित्रदेवते पवि
त्रसम्मार्जने विनियोगः॥ ॐ विष्णोर्मनसा पूतेस्थः॥ इति संमृज्या
ज्यस्यात्पामुदगग्रे पवित्रे निधायाज्यमावपेत्॥ ततो व्यस्तहस्ताङ्गु

एम.

ष्ठोपकनिष्ठाभ्यां गृहीतपवित्राभ्यामाज्यमूर्द्धमीत्वा सकृत्क्षि
पेदनेन॥ प्रजापतिऋषिराज्यदेवताश्चाज्योत्पवने विनियोगः॥ ॐ
देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः
स्वाहा ततो द्विस्त्रीन्क्षिपेत् ततः पवित्रे जलेनाभ्युक्ष्य त्रीन्मन्त्रो
क्षिपेत्॥ ततः आज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायाग्नेरु

उप॰ ३०

नरनोवारचय मवतारयेत् इत्याज्यसंस्कारः॥ ॥एवं स्कृवसं
स्कारोपि॥ ॥ततोभृगतदक्षिणानुः उदकस्यालिमयेकू
त्य॥अग्निः पर्युक्षणं कुर्यात्॥प्रजापतिऋषिरदितिर्देवतोदका
ञ्जलिप्रसेचने विनियोगः॥ॐ अदितेऽनुमन्यस्व इत्यग्नेर्दक्षि
णतः पूर्वार्धा॥प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने एम॰

विनियोगः॥ॐ अनुमतेऽनुमन्यस्व इत्यग्नेः पश्चादुत्तरार्धा॥प्रजापति
ऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने विनियोगः॥ॐ सरस्वत्यनुमन्य
स्व इत्यग्नेरुत्तरतः पूर्वार्धायामञ्जलिधारां दद्यात्॥ततः प्रजापतिऋषिस्त्रिषु
पुरुषः सविता देवता अग्निपर्युक्षणे विनियोगः॥ॐ देवसवितुः प्रसुवयज्ञं
प्रसुवयज्ञपतिं भगाय॥दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पत

उप.
३१

निर्वीचन्नः स्वदतु इति होमीयद्रव्यसहितस्याग्नेर्द्विपरीतवारिधा
रयावेष्टनं कुर्य्यात्॥ ततो जानूत्थाप्य समिधमेकां फलपुष्पकुश
सहितां गृहीत्वा उपरि कृतदक्षिणहस्तो विरूपाक्षं जपेत्॥ परमे
ष्ठी ऋषिस्त्रिपदछन्दः कालाग्निरुद्ररूपोग्निर्देवता विरूपाक्ष
जपे विनियोगः॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च

राम.

मागश्च धृतिश्च धर्म्मश्च सत्वञ्च वाक्च मनश्चात्मा च तानि प्रपद्ये
तानि माम वतु ॐ भूर्भुवः स्वरोँ महात्मानं प्रपद्ये विरूपाक्षो
मिदन्तो जिह्वस्पने शय्यापर्णो गृहान्तरिक्षे विमितं हिरण्मयं त
देवानां हृदयान्यप्सुमये कुम्भे स्वतः सन्निहितानि तानि वनभू
च्चवलसाक्षतो प्रमनीश्वनिमि षतू तत्सत्यं पञ्चे द्वादश पुत्रा

उप.
३२

त्वा सम्वत्सरे सम्वत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्म
चर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्म
णमुपधावन्नुपत्वा धावामि जपन्तं मा मा प्रतिजापिर्जुहन्तं मा
मा प्रतिहौषीः कुर्वन्तं मा मा प्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूत
इदं कर्म्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्मे उपपद्य

राम.

तां समुद्रो माविश्वव्यचा ब्रह्मानुजानातु तथो माविश्वेदा ब्रह्मणः
पुत्रो नुजातु श्वात्रो माप्रचेता मैत्रावरुणो नुजानातु तस्मै विरूपाक्षा
य दन्ताञ्जयेसमुद्राय विश्वव्यचसे नुधाय विश्वेदसे श्वात्राय प्रचे
तसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः॥ इति पठित्वा कुशमेशान्यां प
त्का फलपुष्पं ब्रह्मणे निवेद्य दक्षिणा जानुं पातयित्वा घृताक्तांस

उप
३३

मिधं तूष्णीमग्नौ क्षिपेत्॥ ततस्तस्य संस्कृतस्य समुद्भवसव्यनाम्नो
ग्नेः पश्चात् स्वसन्निधौ दक्षिणो मारुतवकमुपवेश्य व्याहृतिहोमं कु
र्यात्॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता व्याहृतिहोमे विनि
योगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णिक् छन्दो वायुर्देवता व्या
हृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप् छन्दो

राम.

सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषि
र्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥ ॐ भूर्भुवः
स्वः स्वाहा॥ ततः पञ्चभिर्मन्त्रैः पञ्चाहुतिर्जुहुयात्॥ मानवकान्वार
म्भः॥ प्रजापतिऋषिरग्निर्देवता उपनयनहोमे विनियोगः॥ ॐ अ
ग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं॥ तेन दीक्षामि

उप॰ ३४

दमहमनृतात्सत्यमुपैमि स्वाहा॥ प्रजापतिऋषिर्वा पुर्देवता उप
नयनहोमे विनियोगः॥ ॐ वायो व्रतपते व्रतञ्चरिष्यामि॰ तन्मे प्रब्र
वीमि तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा॥
प्रजापतिऋषिः सूर्य्यो देवता उपनयनहोमे विनियोगः॥ ॐ सूर्य्य
व्रतपते व्रतञ्चरिष्यामि॰ तन्मे प्रब्रवीमि तच्छकेयं॥ तेनर्द्ध्यासमिद

राम॰

महमनृतात्सत्यमुपैमि स्वाहा॥ प्रजापतिऋषिश्चन्द्रो देवता उपन
यनहोमे विनियोगः॥ ॐ चन्द्र व्रतपते व्रतञ्चरिष्यामि॰ तन्मे प्रब्रवीमि
तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा॥ प्रजाप
तिऋषिरिन्द्रो देवता उपनयनहोमे विनियोगः॥ ॐ व्रतानां व्रतपते
व्रतं चरिष्यामि॰ तन्मे प्रब्रवीमि तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृ

उप.
३५

तात्सत्यमुपैमि स्वाहा ॥ एवं होमं कृत्वा आचार्य्यः पश्चादग्नेरुत्तरा
ग्रेषु कुशेषु पूर्वाभिमुखः ऊर्द्ध स्थितो भवेत् ततो ऽस्याचार्य्यो मा
ऽ ह्मे मानवकस्याचार्य्याञ्चलेरुपरि कृताञ्जलिराचार्य्याभिमुखो मा
नवक उत्तराग्रेषु कुशेषु तथैव तिष्ठेत् अथास्य मन्त्रवान् ब्राह्मण
तस्य दक्षिणतो वस्त्राय मानवकस्याञ्जलिमुदकेनापूर्य्य पश्चा

राम.

दाचार्य्यस्यापि पूरयेत् ॥ ततो मानवकं प्रेक्षमाण आचार्य्यो जपेदिमं
मन्त्रं ॥ प्रजापतिऋषिरनुष्टुब्दोऽग्निर्वायुसूर्य्यचन्द्रो देवता उप
नयने मानवकप्रेक्षमाणस्याचार्य्यस्य जपे विनियोगः ॥ ॐ आगच्छा
समगन्महि पशुमर्त्यं युयोतन अरिष्टाः सम्चरेमहि स्वस्ति चरताद
पं ॥ ततो मानवकस्य हस्तं नीत्वा आचार्य्यो जपत्यमुं मन्त्रं ॥ प्रजाप

उप॰
३६

तिऋषिः सविनादयोदेवता॰ गृहीतमाणवकहस्तस्याचार्य्यस्य
जपेविनियोगः॥ अग्निस्ते हस्तमग्रहीत्सविता हस्तमग्रहीद्यमा
हस्तमग्रहीत्मित्रस्त्वमसि॰ कर्म्मणाग्निराचार्य्यस्तव॥ अथाचार
चार्य्यो मानवकं यजुरिदं पाठयेत्॥ प्रजापतिऋषिराचार्य्यो देव
ता॰ उपनयने मानवकवाचने विनियोगः॥ ॐ ब्रह्मचर्य्यमागामु

राम॰

पमानयस्व॰ इत्यपिधाय॥ अथमानवकस्य देवताश्चयं नामधेयं प
रिकल्प्याचार्य्यो मानवकमिदं पृच्छेत्॥ प्रजापतिऋषिर्म्माणव
को देवता॰ उपनयने माणवकस्य नामप्रश्ने विनियोगः॥ ॐ कोना
मासि॰ ततो माणवको ऽसौ॰ स्वकीयं कल्पितं नाम उच्चार्य्य॰ आचा
र्य्यायउत्तरं दद्यात्॥ प्रजापतिऋषिर्म्माणवको देवता॰ उपनयने मा

उप.
३)

नवक नामकथने नि नियोगः॥ ॐ विष्णुशर्म्म नामास्मि॥ ॥अ
थोदकाञ्जलिमुत्सृज्य आचार्योदक्षिणेनपाणिना मानवकस्य द
क्षिणपाणिं साङ्गुष्ठमुत्तानं गृह्णीयात्पनेन॥ मन्त्रे चासौ शब्दस्थाने स
म्बोधनेन नाम प्रयोक्तव्यं॥ प्रजापतिऋषिः सविता श्विपूषणो देव
ता उपनयने मानवकहस्तग्रहणे विनियोगः॥ ॐ देवस्य ते सवितुः प्र

राम.

सवे श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामि श्रीविष्णुशर्म्मन्॥ तेन
मानवकस्य हस्तं गृहीत्वा जपेत्॥ प्रजापतिऋषिः सविता देवता गृ
हीतमाणवकहस्ताचार्य्य जपे विनियोगः॥ ॐ अग्निस्ते हस्तमगृह्णीदर्य्य
मा हस्तमगृह्णात्सविता हस्तमसि कर्म्मणाग्निराचार्य्यस्तव॥ अथैतद्देश
स्थमेव माणवकं अग्निं प्रदक्षिणमावर्त्तयेदनेन॥ प्रजापतिऋषि

उप. रनुष्टुप्छन्दः सूर्योदेवतोपनयने मानवकमावर्त्तने विनियोगः॥८

३८ ॐ सूर्यस्यावतमन्वावर्त्तस्व श्रीविष्णुशर्म्मन्॥ ततो दक्षिणेनपाणि
ना मानवकस्य दक्षिणमंशमनुस्पृश्यानन्तर्हितं नाभिमनुस्पृ
शोदनेन॥ अमुपदस्थाने द्वितीयानं नामप्रयोक्तव्यं॥ प्रजापतिऋ
षिरनुष्टुप्छन्दो नाभ्यन्तकोदेवतेउपनयने ब्रह्मचारिनाभिस्प रा.म.

र्शने विनियोगः॥ ॐ प्राणानां ग्रन्थिरसि मा विस्रसो नकरहृदये परि
ददामि श्रीविष्णुशर्म्मणे॥ ततो नाभिदेशोपरिदेशमभिस्पृशोदनेन॥
प्रजापतिऋषिर्बृहतीदेवतोपनयने ब्रह्मचारिनाभिदेशोपरिदेशस्प
र्शने विनियोगः॥ ॐ अकुरहृदये परिददामि श्रीविष्णुशर्म्मणे॥ त
तो मानवकस्य हृदयं स्पृशोदनेन॥ प्रजापतिऋषिः कृशानुर्देवतोप

उप.
३९

नयनेब्रह्मचारिहृदयस्पर्शने विनियोगः॥ ॐ कृशानवे दंते परिददा
मि श्रीविष्णुशर्म्मणे॥ ततो दक्षिणेन पाणिना माणवकस्य दक्षि
णं समालभ्य जपेत्॥ प्रजापतिर्ऋषिः प्रजापतिर्देवता उपनयनेब्र
ह्मचारिदक्षिणांसस्पर्शने विनियोगः॥ ॐ प्रजापतेस्त्वा परिददामि
श्रीविष्णुशर्म्मन्॥ ततो वामेन पाणिना वामांसस्पृष्ट्वा जपेत्॥

राम.

प्रजापतिर्ऋषिः सविता देवता उपनयनेब्रह्मचारिसर्वाङ्गस्पर्शने वि
नियोगः॥ ॐ देवाय त्वा सवित्रे परिददामि श्रीविष्णुशर्म्मन्॥ अथैनं
बोधयति॥ प्रजापतिर्ऋषिर्ब्रह्मचारिदेवता उपनयनेब्रह्मचारिसं
बोधने विनियोगः॥ ॐ ब्रह्मचार्य्यसि श्रीविष्णुशर्म्मन्॥ अथैनं प्रैषं का
रयति॥ प्रजापतिर्ऋषिर्ब्रह्मचारिदेवता उपनयनेब्रह्मचारिप्रैष्यने

उप॰ विनियोगः॥ ॐ समिधमाधेहि ॐ श्रावयाश्रावय ॐ कर्म्म कुरु
४० ॐ मादिवाह्वा मीः प्रति प्रश्रं च ब्रह्मचारिण ॐ इति वक्तव्यं॥ ततः श्रा
चार्य्यः अग्नेरुत्तरतः प्राङ्मुख उदङ्मुखे खुकुशेषु उपविशेत्॥ मान
वकश्च प्रत्यङ्मुखो भूत्वा भूगतदक्षिणजानुराचार्य्याभिमुखस्त
थैव उदङ्मुखे खुकुशेषु उपविशेत्॥ अथैनं मानवकमाचार्य्यश्चिरा

राम॰

कृतां मेखलां कृत्वा यथाप्रवरग्रन्थिं युतां प्रदक्षिणं परिधापयन्
मन्त्रद्वयं पाठयेत्॥ प्रजापतिऋषिस्त्रिष्टुब्दो मेखला देवता उप
नयने मानवकमेखलापरिधापने विनियोगः॥ ॐ इयं दुरुक्तात्प
रिबाधमाना वर्णं पवित्रं पुनती मआगात्॥ प्राणापानाभ्यां बलमाव
हन्ती स्वसादेवी सुभगा मेखलेयं॥ ॐ ऋतस्य गोप्त्री तपसः परस्वी

उप.
४१

घृतीरक्षः सहमानाश्चरातीः॥ सामासमन्नमभिपर्य्येहि भेड़भ
र्त्तारलेमेखलेमारिषाम॥ ततः श्राचारात् कौपीनं परिधापयेत्
॥ सचपूर्ण यज्ञोपवीतभाराडा सूतयं ब्राह्मणेभ्यः प्रत्येकं मा
नवकोदद्यात्॥ ततो यज्ञोपवीतं परिधाप्य न पाठयेत्॥ ब्रह्म
चारीपठनीयो मंत्रः॥ प्रजापतिऋषिर्गायत्री छन्दो विश्वेदेवा

राम.

देवताउपनयने यज्ञोपवीत परिधाने विनियोगः॥ ॐ यज्ञोपवीत
मसि यज्ञस्य त्वोपवीतेनोपनह्यामि॥ ततः एणीयमजिनं परि
धापयेत् पाठयेत्॥ प्रजापतिऋषिः शक्वरीछन्दोऽजिनं देवताउ
पनयने अजिनं परिधापने विनियोगः॥ ॐ मित्रस्य चक्षुर्द्धरुणं
वलीयस्तेजो यशस्विस्थविरं समिद्धं॥ अनाहनस्यम्बसनं जविषं

उप.
४२

पवीतं दत्वा ह्यजिनं दद्यात्॥ ततो माणवकश्चाचार्य्यस्य समीपं गच्छे
देवं कुर्वाणः॥ ॐ श्रुधी हि भोः सावित्रीं मे भवान् ब्रवीतु॥ आचार्य्य
स्तस्मै मानवकाय श्रवणार्थमुपसन्नाय समीक्षमाणाय त्वयमपि स
मीक्षिताय सावित्रीमनुब्रूयात्॥ प्राक्पादशः॥ ततो द्वेशः ततः कृत्स्नां
सावित्रीमध्यापयेत्॥ माणवकोपि तथैवाधीयात्॥ ॥ततः

राम.

मानवकस्य दक्षिणाकर्णे सावित्र्यृषिः विश्वामित्रऋषिर्गायत्री छन्दः
सविता देवता उपनयने सावित्रीदाने विनियोगः॥ ॐ तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ इति प्रथमावृत्तौ क
मः॥ द्वितीयायां॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो
नः प्रचोदयात्॥ तृतीयायां॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥

उप.
४३

धियो यो नः प्रचोदयात् ॥ अत्र तु सहपाठो विशेषः ॥ ततः ॐ महाव्या
हृतीनां ॥ प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निर्वायुसूर्या
देवता उपनयने व्याहृतिदाने विनियोगः ॥ ॐ भूर्भुवः ॐ भुवर्भुवः ॐ स्व
र्भुवः इति ॐ कारदण्डं दद्यात् ॥ अथ ऋजुं केशान्तिकमनग्निदूषितम
वक्रं पालाशदण्डं प्रयच्छेत् मानवकं वाचयति ॥ प्रजापतिऋषिः पं

राम.

क्तिश्छन्दोदण्डाग्निदेवतेउपनयने दण्डार्पणे विनियोगः ॥ ॐ
सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा देवेष्वेवमहं सु
श्रवः सुश्रवा ब्राह्मणेषु भूयासं ॥ अथ मानवको भैक्षं चरेत् ॥ प्रथ
मं मातरमेव भिक्षां याचेत् ॥ ॐ भवति भिक्षां देहि अनेन म
न्त्रेण याचेत् माणवकः प्रथमं भैक्षमाचार्याय समर्पयेत् ॥ तदन

उप.
४४

न्तरमन्यमपि यथा सम्भवं याचेत्॥ आचारात् ॐ भवन्भिक्षाम्मे
देहि इति पुरुषमपि याचेत्॥ अथ यदि समिदाधानं तस्मिन्नेव
क्षणे क्रियते॥ अथ यदि दिनान्तरे समावर्तनं क्रियते तदा व्याहृति
होमादि वामदेवगानांतरं तन्त्रं समाप्य तदा चैवाग्नावाचारात् कर्त्त
व्यं॥ अथ सायं संध्यामुपास्याल्लङ्घने सवितरि क्रियते तदा अनन्त

राम.

रोक्तां कुशाण्डिकामनुसंधाय व्याहृतिहोमं च कृत्वा अग्नेन्तरे समि
दाधानं प्रयोगः कर्त्तव्यं॥ तत्क्रमः॥ माणवकः स्वप्रादेशमितसमिध
न्यं वक्ष्यमाणविधिनाजुहुयात्॥ एकां प्रथमतस्तूष्णीं द्वितीया
मादाय॥ प्रजापतिऋषिरग्निर्देवता अग्नौ समिधादाने विनियो
गः॥ ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे॥ यथात्वमग्ने स

उप.
४५

मिधा समिद्धमेव महमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्र
ह्मवर्चसेन धनेनान्नाद्येन समेधि षीय स्वाहा ॥ इति जुहुयात् ॥
॥ अपरां समिधमाज्यां प्रक्षिपेत् ॥ ॥ ततश्चाचार्य्यो व्याहृ
तिहोमं कुर्य्यात् ॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता व्याहृ
तिहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णिक् छन्दोवा

राम.

युर्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भुवः स्वाहा ॥ प्रजापतिऋषिरनुष्टु
प् छन्दः सूर्य्यो देवता व्याहृतिहोमे विनियोगः ॥ ॐ स्वः स्वाहा ॥ प्रजापतिऋ
षिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः ॥ ॐ भूर्भु
वः स्वः स्वाहा ॥ अधुनापदिशाद्याग्नहोमः क्रियते तदा पञ्चाहुतिहोमेष्व
न्वेष्टव्यः ॥ ततः प्रादेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ त

उप.
४६

तः पुनर्भूगतदक्षिणाजानुः उदकस्थाली मध्ये कृत्य अग्निः पर्युक्ष
णादि कुर्यात् ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्नि
पर्युक्षणे विनियोगः ॥ ॐ देव सवितः प्रसव यज्ञं प्रसुव यज्ञपतिं भ
गाय दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः स्वद
तु ॥ इति होमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधारयावेष्टनं ॥

राम.

ततः प्रजापतिऋषिरदितिर्देवतोदकाञ्जलिप्रसेचने विनियोगः
ॐ अदितेऽनुमन्यस्वेति दक्षिणतः पूर्वाग्रं ॥ प्रजापतिऋषिरनुमति
र्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अनुमतेऽन्वमन्यस्वेति प
श्चादुत्तराग्रं ॥ प्रजापतिऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने वि
नियोगः ॥ ॐ सरस्वत्यनुमन्यस्वेति पुनरुत्तरतः पूर्वाग्रं ॥ पूर्ववद्विपरीतमञ्ज

उप॰
४

लिधारा॰ दधात॥ ततस्तृणकमेणवर्हिरुत्थाप्य जुहिकाम्बुद्वावा
महलेकृत्वा॥ प्रजापतिऋषिर्बर्हिरोदेवतादर्भस्तृणाभ्यञ्जनेविनियो
गः॥ ॐ स्रुचं विहाणा वनुवयः इति मूलमध्याग्रकमेणघृताक्तां
कृत्वा॰ जलेनाभ्युक्ष्याग्नौक्षिपेदनेन॥ प्रजापतिऋषिरनुष्टुप्छन्दो
रुद्रोदेवतादर्भजुहिकाहोमेविनियोगः॥ ॐ यः पशूनामधिपतीरु

राम॰

द्रस्तन्निचोषधा॥ पशूनस्माकं माहिंसीरेतदस्तुहुतमवस्वाहा॥
ततउत्थायब्रह्मचारिदक्षिणाहस्तस्थस्रुक्वेणघृतपुष्पफलपू
र्णान॰ पूर्णाहुतिंदद्यात्॥ प्रजापतिऋषिर्विराट्छन्दः इन्द्रोदेवता
यज्ञस्कामस्यपत्नीयज्ञयोगेविनियोगः॥ ॐ पूर्णाहोमंयज्ञंजुहो
मियोस्मैजुहोतिवरमस्मैददाति॥ वरंवृणेयज्ञसाभामिलोकेस्वा॰

उप
४८

हा नतः ॐ वसुभ्यस्त्वाहेत्यभिघ्नाज्यधारा दद्यात्॥ ॥ततोब्र
ह्मदक्षिणां॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ श्रद्धा कृतैतदुपनयन
होमकर्म्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म्म प्रतिष्ठार्थमिदं पू
र्णपात्रं प्रजापतिदैवतं ब्रह्मणे दक्षिणां नमः॥ ॥ततोग्निपद
क्षिणाक्रमेण हस्तं धौत्वा ब्रह्मणस्तथायनं ग्रन्थिविमोकोवा॥त

राम.

तः कुबेरणभस्मानीपत्यायुषकरणं॥ ॐ आयुषं पमदग्नेरितिहृ
दि॥ ॐ कस्यपस्यायुषमितिदक्षिणबाहुमूले॥ ॐ अगस्त्यस्य
आयुषमितिशिरसि वामबाहुमूले॥ ॐ यद्देवानां आयुषमिति
कण्ठे॥ ॐ तन्नोअस्तु आयुषमितिशिरसि बिंदुं कुर्यात्॥ माण
वकपक्षे तन्नोऽस्त्वस्त्वोनेतन्नेहितिविशेषः॥ ततोपात्रस्थजलमप

उप.
४९

नीपान्यजलेनापूर्य्य तत्र कुसुमं प्रक्षिप्य ॥ दक्षिणादानं ॥ कुश
त्रयाक्षतजलान्यादाय ॥ ॐ अद्य कृतैतदुपनयनहोमकर्म्मप्रति
ष्ठार्थं गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणां दा
तुमहं संमुत्सृज्य ॥ आचारात् यथाशक्ति त्वया ॥ ततः पूर्ववद्वा
मदेव्यगानं ॥ उपनीतः वाहो तत्र त्रयमक्षारलवणं न भुञ्जीत ॥
॥ इत्युपनयनकर्म्म समाप्तं शुभम् ॥

राम

अथ छन्दोगानां वेदारम्भ ॥ ॥ ततः आचार्य्यो मातृका पूजाभु
दयिके कृत्वा पुरस्तात् बहिः शालायां प्राङ्मुख उपविश्य कुशैह
स्तमात्रं भूमिं परिसमुह्य तां कुशांश्च ईशान्यां परित्यज्य गोमयोद
केनोपलिप्य अग्निस्थापनपर्य्यन्तं वामहस्ते

वे॰दा॰
५०

अथ छन्दोगानां वेदारम्भः॥ ॥ततः आचार्यो मातृकापूजा
भ्युदयिके कृत्वा पुरस्तात् बहिःशालायां प्राङ्मुख उपविष्टः गाम
योपलिप्तदेशे कुशास्तिरकां कुर्यात् तत्र क्रमः॥ अभ्युक्षणा
दिकर्म्म कर्तुं कुशप्रच्छादितमुदितमुदकमानेतव्यं कुशैर्हस्त
मात्रं पूर्वोत्तरपूरसमस्तादेशे परिसमुह्य गोमयोदकेनोपलि

राम॰

प्य अग्निस्थापनपर्य्यन्तं वामहस्तं भूमावारोप्य दक्षिणजानुं भू
मावपातयित्वा फलपुष्पकुशानामन्यतमं गृहीत्वा रेखापञ्च
कं कुर्यात्॥ तत्र प्रथमं पूर्वाग्रा द्वादशाङ्गुलप्रमाणा पृथिवीदेव
ताकाध्येया पीतवर्णा रेखा लिखितव्या॥ तद्रेखापश्चिमभागसं
लग्ना एकविंशत्यङ्गुलप्रमाणा अग्निदेवताकाध्येया लोहितवर्णा
इत्तरा

वे॰ दा॰ लेखा लिखितव्या॥ तल्लेखा संलग्ना पूर्वा य लेखा तः षडङ्गुला भ
५१ राला पूर्वगामिनी प्रादेशप्रमाणः प्रजापतिदेवताकाध्येयः कृ
ष्णवर्णा लेखा लिखितव्या॥ तस्या अपि षडङ्गुला भराला पूर्व
गामिनी प्रादेशप्रमाणः इन्द्रदेवताकाध्येयः नीलवर्णा लेखा लि
खितव्या॥ तस्या अपि षडङ्गुला भराला पूर्वगामिनी द्वादशाङ्गुल राम॰

प्रमाणः सोमदेवताकाध्येयः शुक्लवर्णा लेखा लिखितव्या॥ एवं
लेखापञ्चकं कृत्वा॥ अनामिकाङ्गुष्ठाभ्यां ताभ्य एव मृदः खनि
त्वा ऐशान्यामरत्निमात्रे देशे क्षिपेत्॥ ततो जलेन लेखाभ्युक्षः
णं कृत्वा॥ ततः सन्निस्थापितकांस्यभाजनस्थे मो॰ ज्वलत्तृणानि
रसिपत्रेण॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो अग्निर्देवता अग्निसं॰

वेदा
५२

स्कारे विनियोगः॥ ॐ कव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः॥ ततोऽग्निं प्रणयेद्दक्षेन॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवताग्न्युपस्थापने विनियोगः॥ ॐ भूर्भुवः स्वः ईन्धिमुखमग्निं प्रणयेत्॥ ततो वामहस्तं जानूच्चोत्थाप्य॥ अञ्जलिं बद्ध्वा॥ ॐ इहैवाय मितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्नः इ

राम

त्यग्नेरुपस्थानं॥ ततः पाणिना दक्षिणजानुः प्रदेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥ ततो ब्रह्मावरणं॥ ॐ श्रद्धा कर्तव्य वेदारम्भे मे कर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुं त्वमेव ब्रह्मा भव॥ इति ब्रह्माणं वृणीयात्॥ ततो यज्ञाग्निं परिक्रम्याग्नेर्दक्षिणतः ऊर्ध्वजानुः प्रत्यङ्मुखस्तिष्ठन् ब्रह्मा सपाङ्मुखो भवति

वेदा॰ धारा दत्वा तस्योपरि प्राग्ग्रान् कुशान् नासीर्य्य प्रत्यङ्मुख स्तिष्ठ
न् वामहस्ताना मिकाङ्गुष्ठाभ्यां ब्रह्मासनादर्भमेकं गृहीत्वा नैऋत्यां
२३ क्षिपेदनेन ॥ प्रजापतिऋषिर्गायत्रीछन्दोऽग्निर्देवता ब्रह्मासनानु
ज्ञानिरसने विनियोगः ॥ ॐ निरस्तः परावसुः इति तृणान्निरस्य ॥
ततः उदकमुपस्पृश्य ॥ ब्रह्माणमुपवेशयेदनेन ॥ प्रजापतिऋ राम॰

षिस्त्रिष्टुप्छन्दोऽग्निर्देवता ब्रह्मस्थापने विनियोगः ॥ ॐ श्रावसोः सद
ने सीद इति छत्रासनमं ब्रह्माणमुपवेशयेत् ॥ ततो ब्रह्मोपरि प्राग
ग्रकुशानासीर्य्य जलेनाभ्युक्ष्य ब्रह्मानं स्पृष्ट्वा जपेत् ॥ प्रजापति
ऋषिर्गायत्रीछन्दो विष्णुर्देवता जपे विनियोगः ॥ ॐ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं ॥ समूढमस्य पांसुले ॥ इति जप्त्वा नैवपथा

वेदा॰
५४

पराङ्मुखस्थानंगेहेतू॥ब्राह्मणपक्षेतुवरणप्रतिवचनादिकस्तू
क्ष्मं॥ततउपविश्य॥दक्षिणजानुंपातयित्वा॰उपरिकृतदक्षिण
हस्तःकरद्वयमधोमुखंभूमावारोप्यभूमिजपंकुर्यात्॥परमेष्ठी
ऋषिरनुष्टुप्छन्दोग्निर्देवताभूमिजपेविनियोगः॥ॐइदंभूमेर्भ
जामहइदंभद्रंसुमङ्गलं॥पराभपत्नाव्याधत्वान्येषांविन्दतेधनं॥

राम॰

रात्रौवस्त्रशब्दप्रयोगः॥ततोजानूत्थाप्य॰दक्षिणाहस्तेनकुशत्रयंगृ
हीत्वा॰अग्नेरुत्तरादितःप्रदक्षिणाक्रमेणप्रतिसंचंपरिसमूहेय
तु॥कौत्सऋषिर्जगतीछन्दोग्निर्देवताप्रथमस्यषडहस्यषष्ठेअहस्य
ग्निमारुतेशास्त्रेपरिसमूहनेविनियोगः॥ॐइमंस्तोममर्हतेजातवेद
सेरथमिवसम्महेमामनीषया॥भद्राहिनःप्रमतिरस्यसंसद्यग्नेस

वेदा॰ ख्ये मारिषा मावयत्नव॰ इत्यग्नेरुत्तरतः॥ ॐ भरामेध्मं कृणवा माहवीं
५५ षि तेचिनयन्तः पर्ब्बणा पर्ब्बणा वयं॥ जीवातवे प्रतरां साधयाधि यो ग्ने
सख्ये मारिषा मावयत्नव॰ इति पूर्ब्बतः॥ सके मत्वा समिधं साधयाधि
येह्त्वे देवा हविरदन्त्याहुतं॥ त्वमादित्यां आवहतां ह्यस्मत्स्यग्ने सख्ये
मारिषा मावयत्नव॰ इति दक्षिणतः॥ पारिसमूह्य॰ वर्हिभिरग्नेर्मूलान्मा राम॰

छादयन् त्रिरावृत्य पश्चाद्वृत्तं वा॰ पुरस्ताद्दक्षिणतः उत्तरतः पश्चात् स्तरणं
कुर्य्यात्॥ ततः पूर्व्वोक्तान् खादिरादिन विंशति ध्मान् मूलमध्याग्रक्रमे
ण घृताक्तान् प्रादेशद्वयपरिमितान् प्रजापतिं मनसा ध्यात्वा तूष्णीम
ग्नौ जुहुयात्॥ ततस्तूनादेव बर्हिषः सायकुशपत्रद्वयं गृहीत्वा॰ प्रादेश
मात्रं कृत्वा॰ कुशमन्तर्द्धाय छिद्यादनेन॥ प्रजापतिऋषिः पवित्रे देवते॰

वेदा॰ पवित्रछेदने विनियोगः॥ ॐ पवित्रे स्थो वैष्णव्यौ॰ ततो द्विरनुमृज्यादनेन
॥ प्रजापतिऋषिः पवित्रदेवते पवित्रसम्मार्जने विनियोगः॥ ॐ वि
२६ ष्णोर्मनसा पूते स्थः॥ इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे निधा
याज्यमावपेत्॥ ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां॰ गृहीतपवित्रा
भ्यामाज्यमूर्द्ध्नीकृत्वा॰ सकृत्क्षिपेदनेन॥ प्रजापतिऋषिराज्यदे राम॰

वता॰ आज्योत्पवने विनियोगः॥ ॐ देवस्त्वा सविता पुनातु वच्छिद्रेण प
वित्रेण वसोः सूर्यस्य रश्मिभिः स्वाहा॰ ततो द्विरुलूखलं क्षिपेत्॥ ततः पवि
त्रजलेनाभ्युक्ष॰ कुलीमग्नौ क्षिपेत्॥ ततः आज्यपात्रमुदकेनानुमृ
ज्याग्नेरुपरि निधायाग्नेरुत्तरतो वा त्रयमवतारयेत्॥ इत्याज्यसंस्का
रः॥ ॥ एवं स्रुवसंस्कारोपि॥ ॥ ततो भूगतदक्षिणजानुः उदक

वेदा.
५७

स्थालिमग्नेकृत्व॥ अग्निःपर्युक्षणं कुर्यात्॥ प्रजापतिऋषिरदि
तिर्देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अदिते अनुमन्यस्व.
इत्यग्नेर्दक्षिणतः पूर्वायां॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्ज
लिप्रसेचने विनियोगः॥ ॐ अनुमते अनुमन्यस्व. इत्यग्नेः पश्चादु
त्तरायां॥ प्रजापतिऋषिःसरस्वतीदेवतोदकाञ्जलिप्रसेचने विनि

राम.

योगः॥ ॐ सरस्वत्यनुमन्यस्व. इत्यग्नेरुत्तरतः पूर्वायामञ्जलिधारान्द
द्यात्॥ ततः प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवताग्निपर्यु
क्षणे विनियोगः॥ ॐ देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय
॥ दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु इति
होमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधारापवेष्टनं कुर्यात्॥ ततो

वेदा.
५८

जानुस्थाप्य समिधमेकां फलपुष्पकुशसहितां गृहीत्वा उपरि कृ
तदक्षिणहस्तो विरूपाक्षं जपेत्॥ परमेष्ठी ऋषिर्निगद्दृन्दः का
लाग्निरुद्ररूपोग्निर्देवता विरूपाक्षजपे विनियोगः॥ ॐ तपश्च तेज
श्च श्रद्धा च ह्रीश्च सत्यं च क्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्वं च
वाक् च मनश्चात्मा च तानि प्रपद्ये तानि मामवन्तु ॐ भूर्भुवः स्वरों

एम.

महान्नमात्मानं प्रपद्ये विरूपाक्षोसि दन्तांजिह्वस्पते शय्यापर्णा
गृहान्नारिक्षे विमितं हिरण्मयं तद्देवानां हृदयान्यप्सु मे कुम्भे
अन्तः सन्निहितानि तानि बलभृच्च बलसा च रक्षतो प्रमनी अग्नि
मिषन्तं तत्सन्धं यन्ते द्वादशपुत्रान्त्वा सम्वत्सरे सम्वत्सरे काम
प्रेणयज्ञेन याजयित्वा पुनर्ब्रह्मचर्यमुपयन्ति त्वं देवब्राह्म

णोस्मि॰ मनुष्यो ब्राह्मणो वै॰ ब्राह्मणमुपधावत्युपत्वा ध्यावामिज
पन्तं॰ मामाप्रतिजापीर्ज्जु[illegible]न्तं॰ मामो प्रतिहोषिः कुर्व्वन्तं॰ मामाप्रति
कार्षिस्त्वां प्रपद्ये॰ त्वया प्रसृत॰ इदं कर्म्म करिष्यामि॰ तन्मे राध्य
तां॰ तन्मे उपपद्यतां॰ समुद्रो माविश्वव्यचा॰ ब्रह्मा गुजानातु॰ मुथो
माविश्वेदा ब्रह्मणः पुत्रा गुजानातु॰ धात्रो माप्रचेता॰ मित्रावरुणो
तत्रेसमृध्यतां॰

राम॰

गुजानातु॰ तस्मै विरूपाक्षाय दत्ताञ्जये सप्तुद्राय विश्वव्यचसे गु
थाय॰ विश्वेदसे धात्रे प्रचेतसे सहस्वाक्षाय॰ ब्रह्मणः पुत्रायन
मः॥ इति पठित्वा कुशमेशान्यां पत्रं॰ फलपुष्पं ब्रह्मणे निवेद्य॰
दक्षिणजानुं पातयित्वा॰ घृताक्तांसमिधं॰ हुत्वा मन्त्रोक्षिपेत्॥
तदक्षिणे माणवकमुपवेश्य॰ व्याहृतिहोमं कुर्य्यात्॥ प्रजापतिऋ

नि

वेदा. ६०

विर्गायत्री छन्दोग्निर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्र
जापतिऋषिर्हस्तिकछन्दो वायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ
भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दो सूर्यो देवता व्याहृतिहोमे
विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता
महाव्याहृतिहोमे विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ॐ ऋग्वेदाय स्वाहा

राम.

ॐ पृथिव्यै स्वाहा॥ ॐ अग्नये स्वाहा॥ ॐ ब्रह्मणे स्वाहा॥ ॐ सोमाय
स्वाहा॥ ॐ प्रजापतये स्वाहा॥ ॐ छन्दोभ्यः स्वाहा॥ ॐ देवेभ्यः स्वा
हा॥ ॐ ऋषिभ्यः स्वाहा॥ ॐ श्रद्धायै स्वाहा॥ ॐ मेधायै स्वाहा॥ ॐ
प्रज्ञायै स्वाहा॥ ॐ धारणायै स्वाहा॥ ॐ सदसस्पतये स्वाहा॥ ॐ
अनुमतये स्वाहा॥ ॐ यजुर्वेदाय स्वाहा॥ ॐ अन्तरिक्षाय स्वाहा॥८

वेदा-

ॐ वायवे स्वाहा॥ ॐ ब्रह्मणे स्वाहा॥ ॐ सामवेदाय स्वाहा॥ ॐ दिवे
स्वाहा॥ ॐ सूर्य्याय स्वाहा॥ ॐ ब्रह्मणे स्वाहा॥ ॐ अथर्वणवेदाय स्वा
६१ हा॥ ॐ दिग्भ्य स्वाहा॥ ॐ चन्द्रमसे स्वाहा॥ ॐ विष्णवे स्वाहा॥ ॐ स-
रस्वत्यै स्वाहा॥ ॐ वरुणाय स्वाहा॥ ॐ इन्द्राय स्वाहा॥ ॐ अग्नये
स्विष्टकृते स्वाहा॥ ॐ भूः स्वाहा॥ ॐ भुवः स्वाहा॥ ॐ स्वः स्वाहा॥ ॐ ग्रम-

भूर्भुवस्वः स्वाहा॥ इत्याज्याहुतिनन्तरमिष्टाशके वेदारम्भं गुरुका
रयेत्॥ ततः आचार्य्येण॥ ॐ वेदान् अधीहि भोः इति ब्रूयात्॥ ततो
मानवकेन॥ ॐ अध्यापयतु मे भवान् इत्युक्ते॥ तत्र क्रमस्त्वदक्षि
णतउपविष्टउदङ्मुखतिष्ठन्समाचान्तं व्यस्तपाणिभ्यां कृताचा
र्य्यप्रणामं मानवकः आचार्य्येण प्रणवादि प्रणवान्तं सव्याहृति

वेदा

कांगायत्रीं मानवकायपाठयेत् ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ ज
नः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः
प्रचोदयात् ॐ ॥ इति सव्याहृतिकां गायत्रीं मध्याप्य ॥ ततो वेदानुस्व
ध्यापयेत् आचार्य्यः प्रागग्रेषु कुशेषु आसीनं पवित्रपाणिमुदङ्मु
खं तिष्ठन् आचार्य्यं न पाठयेत् ॥ ॥ हरिः ॐ ॥ प्रजापतिऋषिर्गायत्र

६२

राम

त्रीछन्दोग्निर्देवता वेदारम्भे विनियोगः ॥ ॐ समिधाग्निं दुवस्यत घृतै
र्बोधयतातिथिं आस्मिन् हव्या जुहोतन स्वसमिधा यज्ञोचिषे घृतं
तिव्रं जुहोतन अग्नये जातवेदसे ॥ ऋग्वेदादिमंत्रस्य मधुछन्दऋष
िर्गायत्रीछंदोग्निर्देवता वेदारम्भे विनियोगः ॥ ॐ अग्निमीळे पुरो
हितं यज्ञस्य देवमृत्विजं ॥ होतारं रत्नधातमम् ॥ यजुर्वेदादिमंत्रस्य पर

वेदा

६३

मेधीप्रजापतिऋषि र्पुंजुः पांक्तछन्दो नाभिशाखा वत्सगावोदेवता शा
खाछेदने समुन्नयवत्सापाकापाकरणेशाखायागोपस्पर्शने विनि
योगः॥ ॐ इषेत्वोर्जेत्वा वायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय
कर्मणेआप्यायध्वमघ्न्याइन्द्राय भागं प्रजावती अनमीवाअयक्ष्मा
मावस्तेनईशत माघशंसः ध्रुवाअस्मिन्गोपतौस्यात बह्वीर्यजमानस्य

राम.

पशून्पाहि इषेत्वेति द्विपदस्त्र्यक्षरो मंत्रो दैव्य अनुष्टुप्॥ वसोः पावित्रम्॥
सामवेदादि मंत्रस्य गौतमऋषिर्गायत्रीछन्दोग्निर्देवता वेदारम्भे विनि
योग॥ ॐ अग्न आयाहि वीतये गृणानो हव्यदातये॥ निहोता सत्सि बर्हि
षि॥ अथर्ववेदादि मंत्रस्य दध्यङ्ङाथर्वणऋषिर्गायत्रीछंदः आपोदेव
ताशांतिकर्मणि वेदारम्भे विनियोग॥ ॐ शन्नोदेवीरभिष्टयआ

वेदा- पो भवन्तु पीतये ॥ शं योरभि स्रवन्तु नः ॥ स्वस्ति न इन्द्रो इति वाच्या ॥ इति पा
ठ्येन ॥ ततआचार्येन व्याहृतिहोमं कुर्यते ॥ प्रजापतिऋषिर्गायत्री छन्दि
६४ र्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णि
क्छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भुवः स्वाहा ॥ ॐ प्रजा
पतिऋषिरनुष्टुप्छन्दः सवितादेवता व्याहृतिहोमे विनियोगः ॥ ॐ राम-

स्वः स्वाहा ॥ ॐ प्रजापतिऋषिर्बृहतिछन्दो बृहस्पतिर्देवता महाव्या
हृतिहोमे विनियोगः ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ अत्र यदि शान्त्यायनहो
मः क्रियते तदा पद्धतिशेषे अन्वेष्टव्यं ॥ ततः प्रादेशमितां समिधं घृ
ताक्तां तूष्णीं अग्नौ क्षिपेत् ॥ ततो भूगतदक्षिणजानु उदकस्थाली
मग्रे कृत्य अग्निपर्युक्षणादि कुर्यादनेन ॥ प्रजापतिऋषिस्त्रि

वेदा॰ ष्टुप्छन्दसवीतादेवताअग्निपर्य्युक्षणेविनियोगः॥ॐदेवसवितः
प्रसुवयज्ञंप्रसुवयज्ञपतिंभगायदिव्योगन्धर्वःकेतपूःकेतन्नःपुना
६५ नुवाचस्पतिंवाचन्नःस्वदतु॥इतिहोमीयद्रव्यसहितस्याग्नेःवारिधार
यावेष्टनंकुर्य्यात्॥प्रजापतिऋषिरदितिछन्दोग्निदेवताउदकांज
लिप्रसेचनेविनियोगः॥ॐअदितेअनुमन्यस्वाः॥इत्यग्नेःदक्षिणतपू राम॰

वोग्रो॥ॐप्रजापतिऋषिरनुमतिर्देवतोदकांजलिप्रसेचनेविनि
योगः॥ॐअनुमतेअन्वमंस्थाः॥इतिपश्चादुत्तराग्रं॥ॐप्रजाप
तिऋषिःसरस्वतीदेवतोदकांजलिप्रसेचनेविनियोगः॥ॐ
सरस्वत्यनुमन्यस्वाः॥इत्युत्तरतःपूर्वविपरीतांअंजलिधारांदद्या
त्॥ततःस्त्रुवेणक्रमेणवह्निहस्याप्यज्यनिकांवध्वावामहस्तेकृ

वेदा-

त्वा मूलमध्याग्रक्रमेण घृतेनानेन भ्युक्षः॥ प्रजापतिऋषिर्व
योदेवता दर्भतृणाभ्यंजने विनियोगः॥ ॐ अक्रं विहारणाव्यं

६६

तुवयः॥ इति मूलमध्याग्रक्रमेण जेनाभ्यनक्ति॥ ततो जलेना
भ्युक्ष्याग्नौ क्षिपेत्॥ अनेन प्रजापतिऋषिः श्रीनुष्टुप्छन्दोरुद्रोदे
वता दर्भजूहिकाहोमे विनियोगः॥ ॐ यः पशूनामधिपतिरुद्रस्त

राम-

निचरो वृषाप श्रूनस्माकं माहीं सिरेनदत्तुहुतं तवस्वाहा॥ ततः उत्था
य ब्रह्मचारिणा करस्पृष्टं स्कुवेण फलपुष्पताम्बुलघृतधाराऽवि
छिन्नेन पूर्णाहुतिं जुहुयात्॥ दनेन॥ प्रजापतिऋषिर्विराट्छन्द
इन्द्रोदेवता यज्ञास्कामस्य यजनी य प्रयोगे विनियोगः॥ ॐ पूर्णा
होमं यसस्ते जुहोमि यो मे जुहोति वरमस्मै ददाति वरं वृणे यज्ञ-सा

वेदा॰ भामिलोके स्वाहा॰ वसुभ्यः स्वाहा॥ इति जुहुयात्॥ ततः उपविश्य स्रुवे
नभस्मानी य दक्षिणा नामी कास्त गृहीत भस्मना॥ ॐ आयुर्जमद
ग्नेरिति हृदि॥ ॐ कश्यपस्य आयुषमिति दक्षिणा बाहुमूले॥ ॐ अ
गस्त्यस्य आयुषमिति वामबाहुमूले॥ यद्देवानां आयुषमिति कण्ठे
॥ तन्नो अस्तु आयुषमिति शिरसि॥ अनेनैव क्रमेण ब्रह्मचारिमपि॥ एम॰

तत्र तन्नो इत्यस्य स्थाने॰ तन्नेइति विशेषः॥ ततो॰ ब्रह्मदक्षिणा॥ ॐ अ
द्य कृतैतद्वेदारम्भहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्र
तिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणे दक्षिणां नमः॥ ब्राह्म
णपक्षे गोत्रादिकमुच्चार्य्य॥ ततो मिप्रदक्षिणं॰ हस्ते नीत्वा ब्रह्मा
स्थापनं॰ ग्रंथिविमोचनोत्तरं॥ ततः पात्रस्य जलमपनीय पात्रं जलांतरे

वेदा-
६८

णपूर्य्य तत्र कुशु मंक्षिप्य॥ गोदानं कुर्य्यात्॥ ॐ अद्य कृते तत् अमु
ष्य कुमारस्य कर्तव्य वेदारम्भ होम कर्म प्रतिष्ठार्थं गामेकां रुद्रदै
वतां यथानामगोत्रायवा ब्राह्मणाय ह दद्दे॥ दानप्रतिष्ठार्थं च दद्दे॥ य
थाशक्ति सुवर्णं वा दद्दे॥ ततो वामदेव गानं॥ कयानइत्यादि॥ ॥
इति छन्दोगानां वेदारम्भ कर्म समाप्तम् श्रम्॥ ॥ ॥ राम-

अथ समावर्त्तन विधि लिख्यते॥ ॥ समावर्त्तन दिवस एव प्रथमं सावि
त्र देवताक मोदन चरुं कुर्य्यात्॥ तत्र उदूखलं मुसलं शूर्प्पञ्च प्रक्षा
ल्य॥ गोमयोपलिप्ते देशे॥ आचार्य्यः प्राङ्मुख उपविश्य तत्राभ्युक्ष
णादि कर्म्म कर्त्तुं कुशप्रछादित मुदकमानेतव्यं कुशैर्हस्तमात्रं प
रिसमुह्य गोमयोदकेनोपलिप्य अग्निस्थापनपर्य्यन्तं वामहस्तभू

समा.

६९

मावारोप्य दक्षिणजानुं भूमावेव पातयित्वा फलपुष्पकुशानाम
न्यतमं गृहीत्वा रेखापञ्चकं कुर्य्यात् ॥ तत्र प्रथमं पूर्व्वीया द्वादशां
गुलप्रमाणा पृथिवीदेवताकाध्येया पीतवर्णा लेखा लिखितव्या
॥ तल्लेखापश्चिमभागसंलग्ना उत्तरायाः एकविंशत्यंगुलप्रमाणा
अग्निदेवताकाध्येया लोहितवर्णा लेखा लिखितव्या ॥ तल्लेखासंग्रा राम.

पूर्वीयलेखात षडङ्गुलान्तराला पूर्वगामिनी प्रादेशप्रमाणा प्रजाप
तिदेवताकाध्येया कृष्णवर्णा लेखा लिखितव्या ॥ तस्याश्चापि षडङ्गुला
न्तराला पूर्वगामिनी प्रादेशप्रमाणा इन्द्रदेवताकाध्येया नीलवर्णा
लेखा लिखितव्या ॥ तस्याश्चापि षडङ्गुलान्तराला पूर्वगामिनी द्वादश
गुलप्रमाणा सोमदेवताकाध्येया शुक्लवर्णा लेखा लिखितव्या ॥

समा.

७०

एवंनेत्रापञ्चकं कृत्वा॥ अनामिकाङ्गुष्ठाभ्यां ताभ्य एवमङ्गुः स्व
नित्वा ऐशान्यामग्निमात्रे देशे निःक्षिपेत्॥ ततो जलेन नेत्रा
भ्युक्षणं कृत्वा सन्निधापितकांस्यभाजनस्थे नोज्वलन्तृणा
ग्निरस्पर्शनेन॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताऽग्नि
संस्कारे विनियोगः॥ ॐ ऋष्यादमग्निं प्रहिणोमि दूरं यमराज्यं

गम.

गच्छतु रिप्रवाहः॥ ततोऽग्निं प्रणयेदनेन॥ प्रजापतिऋषिर्बृहती
छन्दो बृहस्पतिर्देवताऽग्निस्थापने विनियोगः॥ ॐ भूर्भुवः स्वः
इत्यभिमुखमग्निं प्रणयेत्॥ ततो वामहस्तं जानुचोत्थाप्य॥ अ
ग्निं बध्वा॥ ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्र
जानन् इत्यग्नेरुपस्थानं॥ ततः पाणिं तदक्षिणजानुः॥ प्रादेशमि

समा-
नां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥ ततो ब्रह्मावरणं॥ ततो ग्रे-
णाग्निं परिक्रम्याग्नेरुत्तरतो वस्त्रायऽ ऊर्ध्वजानुः प्रत्यङ्मुखस्तिष्ठ-
७१ न्॥ ब्रह्मासने प्राङ्मुखो मन्त्रोदकधारादत्वा तस्योपरि प्राग्यान्
कुशानास्तीर्य्य वामहस्तानामिकाङ्गुष्ठाभ्यां ब्रह्मासनाद्दर्भमे-
कं गृहीत्वा नैऋत्यां क्षिपेदनेन॥ प्रजापतिऋषिर्गायत्री छन्दोऽ राम-

ग्निर्देवता ब्रह्मासनानृणनिरसने विनियोगः॥ ॐ निरस्तः परावसुः
शनिर्ऋणमिदस्य॥ ततः उदकमुपस्पृश्य॥ ब्रह्माणमुपवेशयेदने-
न॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता ब्रह्मस्थापने विनियो-
गः॥ ॐ ध्रुवसोः सदने सीद इति ध्रुवान्यतमं ब्रह्माणमुपवेशयेत्
॥ ततो ब्रह्मोपरि प्राग्यकुशानास्तीर्य्य जलेनाभ्युक्ष्य ब्रह्माण-

समा.

७२

स्रुष्टा जपेत्॥ प्रजापतिऋषिर्गायत्रीछन्दो विष्णुर्देवता जपे वि
नियोगः॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य
पांसुले॥ इति जप्त्वा तेन पथा परावृत्य स्वस्थानं गच्छेत्॥ ब्राह्म
णपक्षे वरणप्रतिवचनादिकं सूक्ष्मं॥ ततोग्नेः पश्चात् उदूखल
ने पूर्वाग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालितं स्रूदूखलं स्थाप

राम.

येत्॥ ततो व्रीहीन् वा कांस्येन बहून् स्वल्पान् वा उदूखले संक्षिपेदनेन
सकृत्॥ ॐ सविर्त्वा जुषन्निर्वपामि द्विस्त्रीन् ततः उपरि कृतद
क्षिणहस्तः पाणिभ्यां प्राङ्मुखो मुशलेन वारत्रयमवघातं कुर्य्यात्
॥ ततो वारत्रयं सूर्य्येणाविरेचयेत्॥ ततस्त्रिफलीकृतांस्तण्डुलान्
त्रिः प्रक्षाल्य स्वल्पान्मुद्गयेपविवे उदकं च निधाय प्रक्षिपेत्॥

समा-

—७३

स्थाल्पाश्वप्रमाणं निर्व्यगूर्द्ध्वं प्रादेशमात्रं ततः प्रादेशद्वयप्रमा
णं पाणाशमेक्षणं न प्रदक्षिणं चालयन् निपुणं पचेत्॥श
नैश्चरौ स्रुवगृहीते नाज्ये नाभ्युक्ष्य उत्तरस्यां दिशि श्रपयन्नारयेत्
॥ततः पुनरभिघारयेत्॥ततो दक्षिणजानुं पातयित्वा उपरीकृ
तदक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भूमिजपं कुर्य्यात्

राम-

त्॥परमेष्ठीऋषिरनुष्टुप्छन्दोग्निर्देवा भूमिजपे विनियोगः
॥ॐ इदं भूमे भजामहे इदं भद्रं सुमङ्गलं॥परासपन्ना बाधस्वा
न्येषां विन्दते धनं॥एतौ वसुशब्दमुच्चारयेत्॥ततो जानुस्थाप्य
दक्षिणहस्तेन कुशत्रयं गृहीत्वा अग्नेरुत्तरादितः प्रदक्षिणक्र
मेण प्रतिकूलं परिसमूहयेत्॥कौत्सऋषिर्जगती छन्दोग्नि

समा

७४

ईवनापश्चस्य षडहस्य षष्ठे अहन्यग्निमारुते शस्त्रे परिसमूह
नेविनियोगः॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा
मनीषया भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा व
यमव इत्यग्नेरुत्तरतः॥ ॐ भरामेध्मं कृणवामा हवींषि ते चि
तयन्तः पर्वणा पर्वणा वयं॥ जीवातवे प्रतरां साधयाधियोग्नेः

राम.

सख्ये मा रिषामा वयमव इति पूर्वतः॥ ॐ शके मन्वा समिधं साधया
धियस्त्वे देवा हविरदन्त्याहुतं॥ त्वमादित्यो भ्रातृवहनो ह्यसि इमस्य
ग्ने सख्ये मा रिषामा वयमव इति दक्षिणतः भूमिं परिसमुह्य बर्हि
भिरग्ने मूलान्याछादयन् त्रिरावृत्तं पश्चादावृत्तं स्वा पुरस्ताद्दक्षिण
तउत्तरतः पश्चात् स्तरणं कुर्यात्॥ ततः पूर्वो भागः खादिरादिनवि

समा· शानि भ्यां मूलमध्या·यकमेण घृता भ्यां प्रादेशद्वयपरिमिता
त्रः प्रजापतिं मनसा ध्यात्वा·नूष्णीमग्नौ जुहुयात्॥ ततस्तूतादेवव
७५ हिंषः सायकुशपत्रद्वयं गृहीत्वा·प्रादेशमात्रं कृत्वा·कुशमध्यायं
छिन्द्यादनेन॥ प्रजापतिऋषिः पवित्रदेवते पवित्रच्छेदने विनि
योगः॥ ॐ पवित्रस्थो वैष्णव्यौ॥ ततोद्भिरनुमृज्यादनेन॥ प्रजापति एम·

ऋषिः पवित्रदेवते पवित्रसंमार्जने विनियोगः॥ ॐ विष्णोर्मनसा
पूतेस्थः॥ इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे निधायाज्यमाव
पेत्॥ ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां गृहीतपवित्राभ्यामाज्य
मूर्द्ध्वीकृत्य सकृत्क्षिपेदनेन॥ प्रजापतिऋषिराज्यदेवता·आज्यो
त्पवने विनियोगः॥ ॐ देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः

समा· सूर्य्यस्य रश्मिभिः स्वाहा· ततो दिक्षु क्षिपेत् ततः पवित्रेजलेना
स्पृष्ट्वा तूष्णीमग्नौ क्षिपेत्॥ ततश्चाज्यपात्रमुदकेनानुमृज्याग्नेरु
परि निधायाग्नेरुत्तरतो वारत्रयमवतारयेत् इत्याज्यसंस्कारः॥ ॥
एवं स्रुवसंस्कारोपि॥ ॥ततो भूगतदक्षिणजानुः उदकस्थाली
मग्नेकृत्य· अग्निः पर्युक्षणं कुर्य्यात्॥ प्रजापति ऋषिरादिति र्देवतो

७६

राम·

दकाञ्जलिप्रसेचने विनियोगः॥ ॐ अदिते अनुमन्यस्व· इत्यग्नेर्दक्षि
णतः पूर्वायामञ्जलिधारां दद्यात्॥ प्रजापति ऋषिरनुमति र्देवतो
दकाञ्जलिप्रसेचने विनियोगः॥ ॐ अनुमते अनुमन्यस्व· इत्यग्नेः
पश्चादुत्तरायां॥ प्रजापति ऋषिः सरस्वती देवतो दकाञ्जलिप्रसेच
ने विनियोगः॥ ॐ सरस्वत्यनुमन्यस्व· इत्यग्नेरुत्तरतः पूर्वायां॥ ततः

समा॰ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनि
योगः॥ ॐ देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय॥ दिव्यो ग
७७ न्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु॥ इति होमी
यद्रव्यसहितस्याग्नेर्वारिधारयावेष्टनं कुर्यात् प्रदक्षिणाक्रमे
ण॥ ततो जानुस्थाप्य समिधमेकां कुशपुष्पफलसहितां गृही राम॰

त्वा उपरीकृतदक्षिणहस्तो विरूपाक्षं जपेत्॥ परमेष्ठी ऋषिस्त्रि
गदछन्दः कालाग्निरुद्ररूपोग्निर्देवता विरूपाक्षजपे विनियोगः॥
ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं च क्रोधश्च त्यागश्च धृतिश्च
धर्मश्च सत्वं च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मा
मवतु॥ ॐ भूर्भुवः स्वः महो जनो मात्मानं प्रपद्ये॥ विरूपाक्षोस्मि दन्तां

समा· गिस्त स्वने शय्यापर्णे शहान्तरिक्षे विमितं हि रामस्य न देवानां ह
दयान्यपस्मये कुब्जे श्रवः सन्निहितानि तानि वलभृच्चवलसाच
७८ रक्षतो प्रमनी स्वनिमिषद्वन्तस्तं यने द्वादश पुत्रान्त्वासम्भव
सरे सम्वत्सरे कामप्रेरणयज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपय
न्नितं देवे बुद्धाह्मणस्यहं मनुष्ये बुद्धाह्मणे वैश्राह्मणमुपधाव

राम·

न्नुपत्वा धावामिजपन्नं मामा प्रतिजापीर्ज्जुहुनं मामा प्रतिहोषीः कु
र्वन्नं मामा प्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूतइदं कर्म्म करिष्यामि
तन्मे राध्यतां तन्मे समृध्यतां तन्मे उपपद्यतां समुद्रो मावि श्वव्यचा
ब्रह्मानुजानातु मुद्रो मावि श्वदा ब्रह्मणः पुत्रो नुजानातु श्वात्रो मा
प्रचेता मे त्रावरुणानुजानातु तन्मे विरूपाक्षायदनाम्जये समु

समा॰ द्राय॰ विश्वव्यचसे नु॰ थाय॰ विश्ववेदसे श्वात्राय॰ प्रचेतसे सहस्राक्षा
य॰ ब्रह्मणः पुत्राय नमः॥ इति मंत्रेण कुशमेशान्यांत्यक्त्वा॰ फलपु
७९ ष्पब्रह्मणे निवेद्य॥ दक्षिणजानुं पातयित्वा॰ घृताक्तां समिधं नू
त्नीमग्नौ क्षिपेत्॥ ततोऽग्नेः पश्चात् ब्रह्मचारिणे निवेद्य॰ व्याह
तिहोमं कुर्य्यात्॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता॰ व्याहृति राम॰

होमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णिक् छन्दो वा
युर्देवता॰ व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषि
रनुष्टुप् छन्दः सूर्य्यो देवता॰ व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा
॥ प्रजापतिऋषिर्बृहती छन्दो॰ बृहस्पतिर्देवता महाव्याहृतिहोमे
विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ततः पश्चाद्ब्रह्मणा ब्रह्मणेः चहं

तमा-

नि धाय स्रुवेण चरौ घृतं प्रक्षिपेत् तत्र चरौ पूर्वाग्नेरेवाद्वयं उत्त
रेणाग्नेरेवाद्वयञ्च कुर्य्यात् एवन्नवधा विभक्तं भवति ततो वारचतु
ष्टयं स्रुवेण जपं गृहीत्वा स्रुचि निधाय ॐ स्वग्नये स्वाहा इत्य
ग्नेरुत्तरभागे प्राग्घृतं स्रुचैव जुहुयात् ॥ पुनरपि वारचतुष्टयं स्रु
वेण जपं गृहीत्वा स्रुचि निधाय स्वग्नेर्दक्षिणभागे प्राग्घृतं स्रुचा

८० राम-

जुहुयात् ॐ सोमाय स्वाहा ॥ ततः स्रुचि स्रुवेण घृतं दत्वा चरोर्म
ध्यभागात् पूर्वभागञ्च मेक्षणेन प्रचुरतरं हविरवदाय स्रुचि
दत्वा पुनः स्रुवेण स्रुचि घृतं दत्वा अवदानस्थानानि घृतेन
पूरयित्वा अग्नेर्मध्ये स्रुचा जुहुयात् ॥ ॐ सवित्रे स्वाहा ॥ ततः
स्रुवेण स्रुचि वारद्वयं घृतं दत्वा चरोरैशान्यां मेक्षणेन प्रचु

समा॰ पुनरं हविरवदाय स्रुचि निःक्षिप्य॰ वारद्वयं स्रुवेण घृतं दत्वा॰ अ
८१ ग्नेरेशान्यां स्रुचै च जुहुयात्॥ ॐ अग्नये स्विष्टकृते स्वाहा॰ अव
दानस्थाने माज्येन पूरयेत्॥ एष चतुरवर्ति होमप्रयोगः यद्य॰
पि चतुरवर्ति पञ्चावर्ति प्रयोगोग्रश्चकारेण लिखितो॰ तथापि
चतुरवर्ति यजमाने न चतुरवर्ति होम एव कर्तव्यः तथैव व्यवहा राम॰

रणु॰ जामदग्न्यावत्सरिद॰ आर्ष्टिषेणास्तथैव च॥ पञ्चावर्ति
न एवैते॰ अन्ये चतुरवर्तिनः॥ पञ्चावर्तिनां तु॰ पञ्चवारगृही
तमाज्यं स्रुचि स्रुवेण कृत्वाऽग्नेरुत्तरतः प्राग्घृतं स्रुचै च जुहु
यात्॥ ॐ अग्नये स्वाहा॥ ततः पुनरपि स्रुवेण पञ्चवारगृहीत
माज्यं स्रुचि कृत्वाऽग्नेर्दक्षिणतः प्राग्घृतं स्रुचै च जुहुयात्॥

समा॰ ॐ सोमाय स्वाहा॥ ततः स्फ्येनाज्यं स्फ्यि कृत्वा॰ चरोर्म्मध्यभागात्
पूर्व्वभागात् पश्चाद्भागाच्चारत्रयं मेक्षणेन हविरवदाय स्फ्यि प्र
६२ क्षिप्य॰ अवदानस्थानानि घृतेनापूर्य्य॰ पुनरपि घृतं स्फ्येन
स्फ्यि दत्वाग्नेर्म्मध्यभागात् स्फ्याज्जुहुयात्॥ ॐ सवित्रे स्वाहा
॥ ततः स्फ्येनाज्यं चारद्वयं स्फ्यि दत्वा॰ चरोरैशान्यां मेक्षणेन प्र राम॰

प्राज्येन

उत्तरं हविरवदाय स्फ्यि प्रक्षिप्य॰ पुनरपि चारद्वयं स्फ्येन घृतं
स्फ्यि प्रक्षिप्याग्नेरैशान्यां जुहुयात्॥ ॐ अग्नये स्विष्टकृ
ते स्वाहा॥ अवदानस्थानपूरयेत्॥ इति पञ्चावर्त्तिप्रयोगः॥ य
द्यपि चतुरवर्त्तिप्रयोगस्तथापि पञ्चावर्त्तेनोपि रचना॰ कार्य्ये
नित्यात्तदुभयमपि लिखितं॥ ॥ ततो वह्नौ घृतात् स्फ्येन मेक्षणाप्र

समा· क्षेपः॥ततो व्याहृतिहोमः॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देव
ता व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णि
६३ क्छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजा
पतिऋषिरनुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ
स्वः स्वाहा॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृ

राम·

तिहोमे विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ इति सावित्रिचरुक
र्म्म॥ ॥उभयोः स्वात्र आन्सावित्रचरुकर्म्म वामदेव्यगानान्ते
सामान्यपुनरग्निस्थापनं विधाय· समावर्त्तनं कुर्य्यादिति केचि
त्॥ ॥अथ समावर्त्तनारम्भः॥ तदर्थं पुनरपि व्याहृतिहोमः॥ प्र
जापतिऋषिर्गायत्री छन्दोग्निर्देवता व्याहृतिहोमे विनियोगः॥

समा॰ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णिक्छन्दोवायुर्देवता व्याहृति॰
होमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः
८४ सूर्य्यो देवता॰ व्याहृति होमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजाप
तिऋषिर्बृहती छन्दोबृहस्पतिर्देवता॰ महाव्याहृति होमे विनियो
गः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ततो ग्नेः पश्चादाचार्य्यः प्राग्ग्रेषु राम॰

कुशेषु उत्तराभिमुखः उपविश्य॰ ब्रह्मचारी च उत्तराग्रेषु कुशे
षु॰ प्राङ्मुख उपविशति॰ ततो व्रीहियवादि सर्व्वौषधियुताभ्योम्र
भ्यो नानासेनचन्दनादिगन्धयुताभ्यः इषदुष्णाभ्योञ्जलि
मादाय ब्रह्मचारी भूमौ प्रक्षेदनेन॥ प्रजापतिऋषिरग्न्यादि
देवतासमावर्त्तने विनियोगः॥ ॐ ये पक्षतरग्नयः प्रवि

समा· षा मो ह्य उपगो ह्यो मरो को मनो हाः ॥ स्वलो विरु जस्त नूदू षि
रिन्द्रियहा श्वाति ता नू स्रजामि ॥ अथा पर मञ्जलिं· तत एवा
८२ दाय भूमौ त्पजति ॥ प्रजापति ऋषिरनुष्टुप छन्दो घोरादयोदे
वता समावर्त्तने विनियोगः ॥ ॐ यदपां घोरं यदपां क्रूरं यदपा राम·
मशान्तमति तत्स्रजामि ॥ ततः प्रकृता भ्य एवा ह्यो मञ्जलिमा

दायात्मानमभि षिञ्चति ॥ प्रजापति ऋषिरोचनाग्नि र्देवतास
मावर्त्तने विनियोगः ॥ ॐ घोरो वनस्त मिह गृह्णामि· ते नाहं मामभि
षिञ्चामि ॥ पुनरपि ताभ्य एवा ह्यो मञ्जलिमादायात्मानमभ
षिञ्चति ॥ प्रजापति ऋषिरोचनाग्नि र्देवता समावर्त्तने वि
नियोगः ॥ ॐ यशसे तेजसे ब्रह्मवर्चसायवनायेन्द्रियायवीर्य्यायया

समा॰ नाघायरायस्योषायनिष्याग्रपचिन्ये॥ पुनरपि तथैवायोजु
लिमादायात्मानमभिषिञ्चति॥ प्रजापतिऋषिः सप्तपदीपं
क्तिश्छन्दः अश्विनौ देवते समावर्त्तनेविनियोगः॥ ॐ येनश्रि
यसंकृणवंतं येनापामृशनंसुरायेनाक्षरंभ्यभिषिञ्चतं येने॰
मांपृथिवीमहींयज्ञान्तदश्विनायज्ञस्तिनमामभिषिञ्चतं॥ राम॰
मन्त्र ए॰पा

पुनस्तनएवाञ्जलिमादाय मूर्द्धिवौकमात्मानमभिषिञ्चति॥ ततः
समीपएवोत्थायसूर्य्यमुपतिष्ठेत्॥ प्रजापतिऋषिः सूर्य्योदेव
तासूर्य्योपस्थानेविनियोगः॥ ॐ उद्यन्नद्यमित्रमहःसिमरुत॰
द्विरस्यानूप्रानर्य्योरभिरस्यानू॥ दशसनिरसिदशसनिंमाकुर्वी
त्वाविसाम्यामाविश॥ प्रजापतिऋषिः सूर्य्योदेवतासूर्य्योपस्थाने

समा॰

विनियोगः॥ ॐ उ ग्रश्चाज भृष्टिभिरिन्द्रो मरुद्भिरस्वानू सान्नपने
भिरस्वानू॥ ज्ञानसनिरसि ज्ञानसनिम्मा कुर्वीत्वा विशास्यामा वि
शा॥ प्रजापतिऋषिः सूर्यो देवता सूर्योपस्थाने विनियोगः॥ ॐ
उ ग्रश्चाज भृष्टिभिः इन्द्रो मरुद्भिरस्वानू सायंपारभिरस्वानू॥
सहस्रसनिरसि सहस्रसनिम्मा कुर्वीत्वा विशास्यामा विशा॥ प्रजा

७

राम॰

पतिऋषिरनुष्टुप्छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः॥
ॐ चक्षुरसि चक्षुस्त्वमस्य वमे पा प्मानं जहि॥ सोमस्त्वा राजा
वर्ननमस्तेसु मामा हिंसीः॥ ॥ ततो ब्रह्मचारी स्वयमेव मेख
लामधस्तादवतारयेदनेन॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो वरु
णो देवता मेखलामोक्षणे विनियोगः॥ ॐ उदुत्तमं वरुणपाश

समा॰ मस्मद्वाधमेविनश्यमेंश्रथाय॥ श्रथावयमादित्यव्रतेनवा
नागसोश्रदितयेस्याम॥ तदनाचार्योब्रह्मचारीरोगदण्डका
ष्ठमाजिनञ्चापनीय॰ व्याहृतिहोमंकुर्य्यात्॥ प्रजापतिऋ॰
षिर्गायत्रीछन्दोग्निर्देवता व्याहृतिहोमेविनियोगः॥ ॐ भूः स्वा
हा॥ प्रजापतिऋषिरुष्णिक्छन्दोवायुर्देवता व्याहृतिहोमेवि॰ राम॰

नियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः सूर्य्यो
देवता व्याहृतिहोमेविनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषि
र्बृहतीछन्दोबृहस्पतिर्देवता महाव्याहृतिहोमेविनियोगः॥ ॐ
भूर्भुवः स्वः स्वाहा॥ ततोब्रह्मचारी ब्राह्मणान्भोजयित्वा स्व
यम्वाकिञ्चिद्दुग्धमेवभुक्त्वा॰ शिखावर्ज्जंकेशनखलोमा

समा.

निवापयेत्॥ ततो घटाम्बुना स्नातो लंकृतः॥ अहतेवाससीप
रिधाय उष्णीषञ्च मंत्रा मुमंत्रितं द्विजोपवीतं परिधाय
स्वजामादायव धात्पनेन॥ प्रजापति ऋषिर्गायत्री छन्दः श्री
देवता स्वग्वन्धने विनियोगः॥ ॐ श्रीरसि मयि रमस्व॥ इ
ति बध्नाति॥ ततो पुष्पमाल्यं॥ ततः बध्वा उपानहौ परिद

राम.

धाति॥ प्रजापति ऋषि रुपानद्देवतो उपानत्परिधाने विनि
योगः॥ ॐ नेत्रो स्थो नयतन्मां॥ ततो वंशदण्डं गृह्णाति॥ प्रजा
पति ऋषि र्दण्डोदेवता वैष्णवदण्ड ग्रहने विनियोगः॥ ॐ गं
न्धर्वो स्युपारवउपमामव॥ ततश्छत्रं गृह्णाति तूष्णीं॥ ततः प
रिवत्सहितमाचार्य्यमुपगम्य वीक्षेत्॥ प्रजापति ऋषिराचा

समा.

९०

र्य्य परिषदो देवतेभ्या चार्य्य तत्परिषद्दीक्षणे विनियोगः॥ ॐ
यक्षमिव चक्षुषः प्रियो वो भूयासं तत उपविश्य॥ मुखमे
वानूपाणानूप्रसारिताङ्गुलिना करेण स्पृशेत्॥ प्रजापति
ऋषिरनुष्टुप्छन्दो जिह्वा देवता मुखपिधाने विनियोगः॥ ॐ
ओष्ठापिधानानकुलीदन्नपरिमितः परिः॥ जिह्वे माविहलो

राम.

वाचं वाक्माद्ये हवादय॥ ततश्छत्रं नीत्वा रथं सकूवरमभि
स्पृशेत्॥ प्रजापतिऋषिरनुष्टुप्छन्दो रथो देवता रथाभि
मर्शने विनियोगः॥ ॐ वनस्पते वीड्वङ्गो हि भूया अस्मत्स
खा प्रतरणः स्वविरः॥ गोभिः सन्नद्धो असि वीडयस्व॥ ततश्च
तुर्थपादे रथमाक्रम्योपविशति॥ ॐ आस्थाता ते जयतु जे

ग्र.पा

समा-
९१

त्वानि इति मंत्रेण ततः प्राङ्मुख उदङ्मुखो वागत्वा प्रदक्षिणम्
निनि कृत्वा चार्य्यसमीपङ्गच्छति ततश्चाचार्य्यस्तमर्घादिना
पूजयेत् ॥ ततश्चाचार्य्यः परिषद्ब्राह्मणेभ्यश्च अहमेभ्यो
भिवादये इत्यभिवादनं ब्रह्मचारी कुर्य्यात् ॥ नेपि प्रत्यभिवा
दनं कुर्युः ॥ ततो आयुष्मान्भवासौम्य इत्याचार्य्यो ब्रूयात् ततः

समा-

श्याचार्य्यः सर्वकर्म्मसमाधानार्थं प्रायश्चित्तरूपं शाखायन
होमं कुर्य्यात् ॥ ॥ अथ साखायनहोमप्रयोगः ॥ तत्र संकल्पः
॥ ॐ अद्य अमुककर्म्मणि समयाद्यतिक्रमोपजातवैगुण्य
समाधानार्थं शाखायनहोमं करिष्ये ॥ इति संकल्पं कु
र्य्यात् ॥ ततस्तदर्थं व्याहृतिहोमः ॥ प्रजापतिऋषिर्गायत्री छ

सम्रा.

दोग्नि र्देवता व्याहृति होमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजाप
ति ऋषि रुष्णीक छन्दो वायु र्देवता व्याहृति होमे विनियोगः॥
ॐ भुवः स्वाहा॥ प्रजापति ऋषि रनुष्टुप् छन्दः सूर्य्यो देवता
व्याहृति होमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापति ऋषिर्बृ
हती छन्दो बृहस्पति र्देवता महाव्याहृति होमे विनियोगः॥ ॐ

राम.

भूर्भुवः स्वः स्वाहा॥ ततः प्रायश्चित्त होम॥ प्रजापति ऋषि रग्नि
र्देवता प्रायश्चित्त होमे विनियोगः॥ ॐ पाहि नो अग्न एनसे स्वा
हा॥ प्रजापति ऋषि र्विश्वेदेवा देवता प्रायश्चित्त होमे विनियो
गः॥ ॐ पाहि नो विश्वदेवास स्वाहा॥ प्रजापति ऋषि रनुष्टुप्
छन्दो विभावसु र्देवता प्रायश्चित्त होमे विनियोगः॥ ॐ पाहि

समा- बिभावसोस्वाहा॥ प्रजापतिऋषिर्गायत्री छन्दः शातक्रतुर्देव
ता प्रायश्चित्त होमे विनियोगः॥ ॐ सर्वं पाहि शातक्रतो स्वाहा॥
९३ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता प्रायश्चित्त होमे विनि
योगः॥ ॐ पुनरूर्जा निवर्त्तस्व पुनरग्न इषा पुषा पुनर्नः पाह्य
हसः स्वाहा॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता प्रायश्चित्त राम-

होमे विनियोगः॥ ॐ सहरस्मा निवर्त्तस्वाग्ने पित्वस्व धारया॥
विश्वप्स्न्या विश्वतस्परि स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छ
न्दोग्निर्देवता प्रायश्चित्त होमे विनियोगः॥ ॐ प्राशातं पदना
शातं यज्ञस्य क्रियते मिथस॥ अग्ने तदस्य कल्पय त्वं हि वे
त्थ यथा यथं स्वाहा॥ प्रजापतिऋषिः पङ्क्तिछन्दः प्रजापतिर्देवता

समा॰ प्रायश्चित्तहोमेविनियोगः॥ ॐ प्रजापते न त्वदेतान्यन्योविश्वा जातानि परिता बभूव॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा॥ ततः प्रजापतिऋषिर्गायत्रीछन्दोऽग्निर्देवता व्याहृतिहोमेविनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो वायुर्देवता व्याहृतिहोमेविनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमेविनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमेविनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ततः प्रादेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥ ततः पुनरपि भूमौ दक्षिणजानुं उदकस्थाली मध्ये कृत्वा मन्त्रैः पर्युक्षणादि

९४

राम॰

स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमेविनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमेविनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ततः प्रादेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥ ततः पुनरपि भूमौ दक्षिणजानुं उदकस्थाली मध्ये कृत्वा मन्त्रैः पर्युक्षणादि

समा· कं कुर्य्यात् ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निप
र्युक्षणे विनियोगः ॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भ
९५ गाय ॥ दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः
स्वदतु इति होमं कृत्वा सहितस्याग्नेर्वारिधारया वेष्टनं कुर्य्यात् ॥ राम·
ततः प्रजापतिऋषिरादित्यो देवतोदकाञ्जलिप्रसेचने विनियो

गः ॥ ॐ अदितेऽनुमन्यस्वेत्यग्नेर्दक्षिणतः पूर्वार्धे ॥ प्रजाप
तिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अ
नुमते अन्वमंस्थाः इति पश्चादुत्तरार्धे ॥ प्रजापतिऋषिः सरस्व
ती देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ सरस्वत्यनुमंस्थाः इ
त्युत्तरतः पूर्वार्धे · पूर्वविपरीतमञ्जलिधारादद्यात् ॥ ततस्त्र

समा.

९६

रणा क्रमेण बहिर्हृत्वाप्य जुहिकां वध्वा वामहस्ते कृत्वा ॥ प्रजाप
ति ऋषिर्वयो देवतादर्भा नृणां भ्यञ्जने विनियोगः ॥ ॐ अ ऋंवि
हा वाग्यन्नुवयः इति मूल मध्याग्र क्रमेण जुहिकां घृता क्तां कृत्वा
जलेनाभ्युक्ष्याग्नौ क्षिपेदनेन ॥ प्रजापति ऋषिरनुष्टुप्छन्दो रुद्रो
देवतादर्भ जुहिका होमे विनियोगः ॥ ॐ यः पशूनामधिपती

राम.

रुद्रस्तस्मिन्नेरो वृषा ॥ पशून्नस्माकं माहिंसीरेतदस्तु हुतन्नवस्वा
हा ॥ ततउत्थाय ब्रह्मचारी दक्षिणहस्तस्पृष्टस्फ्येण फलपुष्प
घृतपूर्णेन पूर्णाहुतिं दद्यात् ॥ प्रजापति ऋषिर्विराट्छन्दो रुद्रो
देवता यज्ञस्कामस्य यजनी यज्ञ योगे विनियोगः ॥ ॐ पूर्णाहो
मं यज्ञस्ते जुहोमि यो मे जुहोति वर मस्मै ददाति ॥ वरं वृणे यज्ञ

समा॰ स्वाभिमिलो के स्वाहा॰ इति पूर्णाहुतिं दद्यात्॰ ततः वसुभ्यः स्वाहे
त्यविच्छिन्नामाज्यधारां दद्यात्॥ ॥ततो ब्रह्मदक्षिणा॥ कुश
त्रयाक्षतजलान्यादाय॥ ॐ अद्य कृतैतत् समाधर्त्त नहोम क
र्म्मणि कृताकृतावेक्षण रूप ब्रह्म कर्म्म प्रति स्वार्थमिदं पूर्ण राम॰
पात्रं प्रजापतिदैवतं ब्रह्मणे दक्षिणां नमः इति दक्षिणां दद्यात्

॥ततोग्निप्रदक्षिणं कृत्वा हस्तं प्रक्षाल्य ब्रह्मणो स्थापनं॰ यज्ञिवि
मोकोवा॥ ततः स्फ्यलग्न सघृत भस्म नाज्यायुष करणं॥ ॐ आ
युषं यमदग्नेरिति हृदि॥ ॐ कश्यपस्य ज्यायुष मिति दक्षिणाबा
हुमूले॥ ॐ अगस्त्यस्य ज्यायुष मिति वामबाहुमूले॥ ॐ यद्देवा
नां ज्यायुष मिति कण्ठे॥ ॐ तन्नो अस्तु ज्यायुष मिति शिरसि॰

समा.

९८

बिन्दुं कुर्य्यात् ॥ ब्रह्मचारिपक्षे तन्नोऽत्यस्य स्थाने तन्न इति वी
शेषः ॥ ततः पात्रस्थं जलमपनीय पात्रमन्यजलेनापूर्य्य तत्र कु
शुमं प्रक्षिप्य ॥ दक्षिणादानं ॥ कुशत्रयाक्षतजलान्यादाय ॥ ॐ
अद्य कृतैतत्सावित्रचरुहोमसमाप्तर्नैतकर्म्म प्रतिष्ठार्थं गामे
कां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहं

राम.

समुत्सृज्य ॥ यथाशक्ति स्ववर्णं वा ॥ ॥ ततः पूर्ववत् वामदेव
गानं कुर्य्यात् ॥ ॥ ततः दुर्वाक्षतदानं ॥ अत्र प्रभृति स्त्रीत्रियस
हभोजनम् ॥ ॥ इति छन्दोगानां विवाहादिपद्धतिः समाप्ता ॥

गुरु२ नेपालीयपुस्तकस्थसम्वत् ९११ श्रीसम्वत् १९६४ साके स
म्वत् १८२९ फाल्गुणमासे शुक्लपक्षे अष्टमी भौमवारे लिखि

समा॰ तमिदमुश्रीगोविन्दलालशर्म्मनेनलिखितमिदमुकषेनछ
ईर्ष्य दोगानांदशकर्म्मपद्धतिः॥ ॥श्रीः॥ तैलाद्रक्षेज्जलाद्रक्षे
च्छीराद्रक्षेच्चपुस्तकान्॥ कषेनलिखितंनूनं॰पुत्रवत्प्रतिपा
लयेत्॥ शुभसर्वदा॥ शुभं॥ ॥ ॥ ॥ ॥

राम॰

स्यास्यक्रतावृधः॥ घृतश्चुतोमधुश्चुतो [illegible] विराजोना
मकामदुघाअक्षीरमाणाः॥ इतिपठित्वावरःशिरसिअक्षतादिकं
दत्वाःयज्ञोपवीतंपरिदधाति॥ ॥अथावृसंगनपहनीयं॥ ॐ
आशुःशिशानोवृषभोनभीमोघनाघक्षोभणश्चर्षणीनां॥ सं
क्रंदनोनाभिषेणाजिमुन्नाद्यन्कारेणदुश्च्यवनोनधृष्णुना॥ न

दिन्देराजर

वरणा १

१ ॐ नमः श्रीगणेशाय ॥ ॥ अथ आचार्य्यवर्णपक्षे ॥ ॐ अद्यामु
कमासे इमुकपक्षे इमुकतिथौ अमुकगोत्रस्य यथानामधेयस्य
मम नामकरण अन्नप्राशन चूडाकरणोपनयनादिकर्म्म कर्तु
मात्मानं वरयितुं अमुकगोत्रं अमुकप्रवरं श्री अमुकशर्म्माणं आ
ह्वयामेभिः पुष्पचन्दनताम्बूलवस्त्रोपवीतवासोभिराचार्य्यत्वे

राम १

नत्वामहं वृणोमीति कुमारः ॥ आचार्य्य वृणुयात् ॥ ॐ वृतोस्मीति
आचार्य्यः ॥ ॐ यथाविहितं कर्म्म कुरु इति कुमारः ॥ ॐ करवाणी
ति आचार्य्यो वदेत् ॥ ॥ अथ षोडशमातृकापूजाविधिर्लिख्यते ॥ प्रातः काले स्नातः कृतनित्यक्रियेण आचार्य्यः प्राङ्मुखपु
ष्पुरवउपविश्य आचम्य ॥ ज्वालितदीपमागत्य ॥ शुक्लांबरः

0 centimeters 5 10 15 20

मान्

धरः कुशहस्तः ॥ यवाक्षतविकारान् सदुर्वाङ्कुरगोमयान् षोड
शगोष्टकृत्वा भीत्यां पंक्तिक्रमेण स्थापयेत् यथा ॥ ॥ ऋषि
२ छन्दः ॥ संकल्पः ॥ कुशतिलजलान्यादाय ॥ ॐ अद्य अमुक
मासे २ मुकपक्षे २ मुकतिथौ अमुकगोत्रस्यामुकस्य कुमारस्य
कर्तव्यनामकरण अन्नप्राशन चूडाकरण यज्ञोपवीतादि विवाह

राम
२

यथाकर्म निमित्तकगणपतिदुर्गाश्रीसहिताः गौर्यादि षोडशमा
तृकाः पूजयिष्ये ॥ इति संकल्प्य ॥ ॥ तत्र प्रथमे ॥ गणपतिः गौरी
पद्मा शची मेधा सावित्री विजयाजया ॥ देवसेना स्वधा स्वाहा मात
रो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिः तथात्मकुलदेवताः दुर्गाश्री
॥ १९ ॥ तत्राक्षतराशिं पुरस्थिकास्वनाप्रत्येकं स्पृशेत् ॥ तत्र क्रमः ॥ कुशो

मातृ

न॥ प्रथमे॥ ॐ गणपतिरसि॥ ॐ गौर्यसि॥ ॐ पद्मासि॥ ॐ सरस्वतीसि॥
ॐ मेधासि॥ ॐ सावित्र्यसि॥ ॐ विजयासि॥ ॐ जयासि॥ ॐ देवसेनासि॥
ॐ स्वधासि॥ ॐ स्वाहासि॥ ॐ मातरस्य॥ ॐ लोकमातरस्य॥ ॐ हृदिरसि॥
ॐ पुष्टिरसि॥ ॐ तुष्टिरसि॥ ॐ आत्मकुलदेवतासि॥ ॐ दुर्गासि॥
ॐ श्रीरसि॥ इति प्रत्येकं रक्षिकां स्पृष्ट्वा॥ ततः अक्षतमादाय॥ गणा

२

रम

३

पतिदुर्गाश्रीसहिताः षोडश मातृकानावाह्यस्थापयेत्॥ तत्र क्रमः॥
ॐ भूर्भुवः स्वः गणपते इहागच्छ इहतिष्ठ॥ एवं क्रमेण गौर्यादि॥ त
तः अक्षतमादाय॥ ॐ मनोजूतिर्जुषतां माज्यस्य बृहस्पतिर्यज्ञमि
मन्तनोत्वरिष्टं यज्ञं समिमं दधातु॥ विश्वेदेवा इह मादयन्तामो
प्रतिष्ठ॥ गणपतिदुर्गाश्रीसहिताः षोडश मातरः सुप्रतिष्ठिता भवन्तु॥

मात्र
४

इत्यक्षतमाकीर्य्य प्रतिष्ठां कुर्य्यात् ॥ तत्र पूजयेत् ॥ ततः पाद्यादिदद्या
त् ॥ ॐ एतानि पाद्यादिनि ॐ गणपतयेनमः ॥ इदमनुलेपनं ॐ गण
पतयेनमः ॥ इदं सिंदुरं ॐ गणपतयेनमः ॥ इदमक्षतं ॐ गणपत
येनमः ॥ इदं पुष्पं गणपतयेनमः इति पुष्पैस्त्रिः पूजयेत् ॥ एतानि
गन्धपुष्पधूपदीपताम्बूलयथाभागनैवेद्यानि ॐ गणपतयेनमः ॥

रामः
४

ॐ गणानांत्वा गणपतिः हवामहे प्रियाणांत्वा प्रियपतिः हवामहे
निधीनांत्वा निधिपतिः हवामहे वसो मम आहमजानि गर्भधमा
त्वमजासि गर्भधं ॥ प्रणमेत् ॥ अनेनैव क्रमेण सर्वं च पूजयेत् ॥ ए
तानि पाद्यादिनि एवोर्घः ॐ गौर्यैनमः ॥ चन्दनाक्षतपुष्पादिकं द
द्यात् ॥ एतानि गन्धपुष्पधूपदीपताम्बूलयथाभागनैवेद्यानि ॐ

मा॰ह॰
५

मोदायै नमः॥ एवं पुनः पद्मादि पाद्यादिभिः प्रत्येकं पूजयेत्॥ ॐ प
द्मायै नमः॥ ॐ मेधायै नमः॥ ॐ मेधायै नमः॥ ॐ सावित्र्यै नमः॥ ॐ वि
जयायै नमः॥ ॐ जयायै नमः॥ ॐ देवसेनायै नमः॥ ॐ स्वधायै नमः॥
ॐ स्वाहायै नमः॥ ॐ मातृभ्यो नमः॥ ॐ लोकमातृभ्यो नमः॥ ॐ
हृष्ट्यै नमः॥ ॐ पुष्ट्यै नमः॥ ॐ तुष्ट्यै नमः॥ ॐ आत्मकुलदेवतायै

राम॰
५

नमः॥ ॐ दुर्गायै नमः॥ ॐ श्रियै नमः॥ एवं प्रत्येकं गन्धपुष्पसिन्दूरार्चनै
र्वेद्यादिभिर्दुर्गाश्रीसहिताः षोडशमातरः पूज्याः॥ ॥ ततः ॐ गण
पतिदुर्गाश्रीसहिताः षोडशमातरः पूजिताः क्षमध्वं॥ इति नमस्कृत्य वि
सर्ज्जयेत्॥ ॐ श्रीमहिषमस्त इति श्रियं नमस्कृत्य विसर्ज्जयेत्॥ ॥
अथ वसोर्द्धारादयात्॥ ततः कांस्यार्घस्य घृताभिघातेन भिन्नोपी

मातृ
६

ठेवातेषामुपरि त्रिः पंचतप्तघृतधारा उत्तरोत्तरक्रमेण दद्यात् ॥
फलप्रतिच्छेदनेनानेन मंत्रेण ॥ ॐ वसोः पवित्रमसि शतधारं वसोः
पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु ॥ वसोः पवित्रेण शत
धारेण सुप्वा कामधुक्षः ॥ इति मंत्रेण दद्यात् ॥ ततश्च फलादिभिः
प्रतिच्छेत् ॥ इति मात्रिकापूजाविधिः ॥ ॥

रामः
६

श्रा

अथाभ्युदयिकश्राद्धप्रयोगः ॥ तत्र दक्षिणोत्तरक्रमेण द्वादशस्थाने क्षेत्रे
कमासादितद्रव्यं ज्ञातिनदीपंश्राद्धदेशमागत्याचम्य प्राङ्मुख उदङ्मुखो वा
उपविष्टः ॥ सर्वं सव्येनकर्तव्यं ॥ ऋजुत्रयं कुशाः ॥ तिलस्थाने सर्वैरेवका
र्यं ॥ तत्र क्रमः ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पु
राडरीकाक्षं स बाह्याभ्यन्तरशुचिः ॥ ॐ पुराडरीकाक्षः इति मंत्रेण श्रा

श्रा भ्यु ७

द्वीपइत्यानि कुशोदकेन सिंचेत् ॥ ततो नान्दिमुख श्राद्धं संकल्पं कुर्य्यात् ॥ कुशत्रयं जवजलान्यादाय ॥ ॐ अद्या मुक मासे अमुक पक्षे अमुक तिथौ अमुक गोत्रस्या मुक कुमारस्य कर्त्तव्य नामकरण अन्नप्राशन चूडाकरणोपनयनादि विवाह यथा नाम निमित्तक नान्दीमुखा भ्युदयिक श्राद्ध महं करिष्ये ॥ इति संकल्पं कुर्य्यात् ॥ ततः गायत्रीं त्रिर्जपित्वा ॥ ॐ दे

राम ७

वताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वधायै स्वाहायै नित्यमेव भवन्त्वित ॥ इति त्रिर्जपित्वा ॥ कुशत्रयं जवजलान्यादाय ॥ ॐ अद्य विश्वेदेवा इदमासनं वो नमः ॥ पुनः २ ॥ पुनः सव्येन कुशत्रयं जवजलान्यादाय ॥ ॐ अद्या मुक गोत्रे मातर मुक देवि नान्दीमुखि इदमासनं तुभ्यं वृद्धिः ॥ एवं पितामही प्रपितामहीभ्यां दद्यात् ३ ॥ कुशत्रयं जवजलान्यादाय ॥ ॐ

0 centimeters 5 10 15 20 25

श्राभ्यु
८

श्रद्धामुकगोत्रपितरमुकशर्म्मन्नान्दीमुखइदमासनंतुभ्यंधृद्धिः॥एवंपि
तामहप्रपितामहयोरपि३॥कुशत्रयंजवजलान्यादाय॥ॐश्रद्धामुकगो
त्रमातामहश्रमुकशर्म्मन्नान्दीमुखइदमासनंतुभ्यंधृद्धिः॥एवंप्रमाता
महवृद्धप्रमातामहयोरपिः श्रासनंप्रत्येकमुत्सृज्य॥३॥ॐविश्वान्देवान्न
इमावाहयिष्ये॥ॐविश्वेदेवासश्रागच्छतशृणुतामइमंहवंमेयेश्रन्त

राम
८

रीक्षेयेउपयविष्टःयेश्रग्निजिह्वाउतवायेजत्राश्रासद्यास्मिन्बर्हिषिमाद
यध्वं॥ॐश्रागच्छन्तुमहाभागाविश्वेदेवामहाबलाःयेयत्रयोजिताःश्राद्धे
सावधानाभवन्तुते॥ॐयवोसियवयास्मद्देषोयवयारातीः॥इतिविश्वे
देवान्नपात्रोपरियवान्विकीर्य्य॥ॐमानूनान्दीमुखीरहमावाहयि
ष्ये॥उसन्नस्त्वानिधीमहुसन्नःसमिधीमहि॥श्रावहपितॄन्हविषे

श्राभ्यु
र्ध

श्वन्नवे ॥ ॐ आ प्रयन्तु नः पितरः सोम्यासो ऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अ
स्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु ते वं त्वस्मान् ॥ इत्यावाहनं कुर्य्यात् ॥
ॐ अपहता असुरा रक्षांसि वेदिषदः ॥ मात्रादि पात्रोपरि पवान्निकीर्य ॥ ततः
गन्धादि दानं ॥ कुशत्रयजवजलान्यादाय ॥ ॐ अद्य विश्वेदेवा एतानि ग
न्धपुष्पधूपदीपताम्बूलानि वो नमः ॥ पुनः २ ॥ कुशत्रयजवजलान्यादा

रामः
र्ध

य ॥ ॐ अद्यामुकगोत्रे मातरमुकदेवी नान्दीमुखिव एतानि गन्धपुष्पधूपदी
पताम्बूलानि तुभ्यं वृद्धिः ॥ एवं पितामही प्रपितामहीभ्यां दद्यात् ॥ ३ ॥ कु
शत्रयजवजलान्यादाय ॥ ॐ अद्यामुकगोत्र पितर मुकशर्म्मन्नान्दीमु
खएतानि गन्धपुष्पधूपदीपताम्बूलानि तुभ्यं वृद्धिः ॥ एवं पितामह
प्रपितामहयोरपि दद्यात् ॥ ३ ॥ एवं मातामह प्रमातामह वृद्ध प्रमातामहे

श्राभ्यु
१०

भ्योपिद घात्॥३॥ ततो विश्वेदेव पूर्वं पित्रादि पात्रे मण्डलं कृत्वा॥ प्र:
ग्नेः करणं॥ ततः जलपुटकादौ हस्तेनैव सघृतमन्नं॥ ॐ स्वाहाग्नय
ये कव्यवाहनाय॥ ॐ स्वाहा सोमाय पितृमते॥ ॐ स्वाहा भूः॥ ॐ स्वा
हा भुवः॥ ॐ स्वाहा स्वः॥ इत्याहुतिं जुहुयात्॥ किंचिदन्नं तिल घृतमधु
सहितं भूस्वामिनेद घात्॥ अपसव्यं कृत्वा॥ मोटकतिलजलान्यादा

रम
१०

य॥ ॐ इदमन्नमेतत् भूस्वामि पित्रिभ्यो नमः॥ सव्यं कृत्वा हरिं स्मृत्वा॥
ततोहुतसेषान्नं देव पूर्वं पित्रादि पात्रे किंचित्किंचिद्दत्वा ततो न्यद
न्नं यथा सम्भवं सर्वत्र परिविष्य श्रन्नोपरि घृत यवदानं॥ द्वादशपुट
केषु जलं घृतं दत्वा सर्वत्र देव पूर्वं॥ ततो पनीयपात्रमालभेत्॥ तत्रक्र
मः॥ उभानपाणिभ्यां प्रथमं देव पात्रमालभ्य॥ ॐ पृथिवीते पात्रं द्यौ

श्राभ्यु
११

रपिधानं वांह्लरा स्य मुखे अमृतेअमृतं जुहोमि स्वाहा॥ ॐ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले कृष्णकव्य मिदं रक्षमदीयं
॥ ॐ इदमन्न मित्यन्ने॥ ॐ इमा आपः इति जले॥ ॐ इदमाज्य मिति घृते॥
ॐ इदं हवीं इत्यन्ने॥ दक्षिणकराङ्गुष्ठं निवेश्य॥ ॐ प्रवोसि प्रवयास्म
द्देवो प्रवपारानिः॥ इत्यन्नोपरि प्रवान्विकीर्य्य॥ कुशत्रप्रजवजलान्यादा

राम
११

प्य॥ ॐ अद्य विश्वेदेवा इदमन्नं तोपकरणं वो नमः॥ पुनः २॥ एवमेव क
मेण मातृपात्रमालभेत्॥ ॐ पृथिवी ते पात्रं इत्यादि पठनीयं॥ ततः
कृष्णकव्य मिदं रक्षमदीयं शेषं पूर्ववत्॥ ॐ अपहता असुरा रक्षांसि वे
दिषद इत्यन्नोपरि प्रवान्विकीर्य्य॥ कुशत्रप्रजवजलान्यादाय॥ ॐ अ
द्य मुकगोत्रे मातर मुकदेवि नान्दीमुखि इदमन्नं तोपकरणं नमः

द्धिः॥ एवं पितामही प्रपितामही भ्यां दद्यात्॥ एवं पितृपात्रमालभेत्
प्रवविकरणपर्य्यन्तं पूर्ववत् कृत्वा॥ कुशत्रयं प्रवजनान्यादाय॥ ॐ
अद्यामुकगोत्र पितर मुकशर्म्मन्नान्दीमुखइदमन्नं सोपकरणं तृ
प्यंतु॥ एवं पितामह प्रपितामहयोरपि॥ एवं मातामह प्रमातामह वृद्धप्रमातामहे
भ्योपि दद्यात्॥ इत्यन्नोत्सर्गः॥ गायत्रीं जिज्जपेत्॥ ततोभ्यर्चनिम्ब

धा॥ ॐ अन्नहीनं क्रियाहीनं विधिहीनं चयद्भवेत् तत्सर्वमच्छिद्रमस्तु
॥ इति पठित्वा गायत्रीं जिज्जपित्वा कुशेषु पविश्य॥ सव्याहृतिकां गा
यत्रीं जिज्जपेत्॥ ॐ मधुमधुमधु इति जपेत्॥ नमधुवाता ऋतायते
नपि चमन्वानः नउदीरतानः पवित्रा॥ जपेत्॥ ततः कृतपवित्र पाठ
पाठ ॐ उदीरताऽइत्यादि जपेत्॥ अन्यानि पूर्वशक्ति कृतपवित्रादि जपेत्॥

श्राभ्यु॰
१३

ततः त्रिकुशा अमौ निधाय॥ अग्निदग्धाश्च ये जीवा
ये चाप्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यंतु तृप्ताः यांतु परां गतिं॥ इति मं
त्रेण भूमौ कुशोपरि सजलान्नं विकिरेत्॥ ततः शाचम्य॥ हरिं स्मृ
त्वा गायत्रीं त्रिर्जप्त्वा॥ ॐ मधु मधु मधु॥ दक्षिणान्दद्यात्॥

राम॰
१३

कुशत्रयजवजलान्यादाय॥ ॐ अद्य विश्वेषां देवानां कृतैतदाभ्युद
यिकश्राद्धप्रतिष्ठार्थमिमे फलमूलवनस्पतिदैवतेयथानामगो
त्रायश्रीलराम यदक्षिणामहं ददे॥ एवं पुनः॥ सव्येन कुशत्रयजव
जलान्यादाय॥ ॐ अद्य अमुकगोत्रा अमातुरमुकादेव्याः नांदीमु
ख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमे फलमूलवनस्पति

दैवते यथानामगोत्रायशर्मणे दक्षिणामहं ददे ॥ एवं पितामहीप्र
पितामहीभ्यां श्राद्धे दक्षिणां दद्यात् ॥३॥ कुशत्रयं यवजलान्यादा
य ॥ ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणो नाम्नो मम सुखस्य कृतैतत्
श्राद्धप्रतिकश्राद्धप्राप्तिद्वारार्थमिमे फलमूलेवनस्पतिदैवते यथा
नामगोत्राय शर्मणे दक्षिणामहं ददे ॥ एवं पितामहप्रपितामह

दिकर्तव्यं ॥३॥ एवं मातामहप्रमातामहवृद्धप्रमातामहेभ्यो दक्षिणां दद्या
त् ॥३॥ ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्यस्एव च नमः स्वधायै स्वा
हायै नित्यमेव भवन्ति नमः ॥ इति त्रिर्जपेत् ॥ ततो दीपं निर्वाप्य हस्तौ
पादौ प्रक्षाल्याचम्य हरिं स्मृत्वा ॥ ॐ प्रमादात् कुर्वतां कर्म प्रच्यवे
ताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ ॥

श्रा भ्यु
१५

ॐ कप्रानेतिमहावैवामदेवऋषिर्गायत्रीछन्दः ईन्द्रोदेवताग्नि
ष्टोमादौद्वितीयपृष्ठाग्निकर्मनिबर्जपेविनियोगः॥ ॐ कप्रानश्चि
त्रश्रा भवदूतिसदावृधसखाकप्राःशचिष्ठप्रावृताकस्त्वासत्योम
दानांमहिष्ठोमत्सदंधसा दृढाचीदारुजेवसुआभिष्टुनः॥सखी
नामपिनोजरिहृणांशतंम्भवास्तुतये॥ॐ स्वस्तिनईन्द्रोवृद्धश्रवा

राम
१५

श्रा भु

१६

वाँ स्वस्तिनः पूषा विश्ववेदाः स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृ
हस्पतिर्दधातु ॥ ॐ प्रजापतिर्वै वामदेव्यं प्रजापतायैव प्रतिष्ठां यो ति
ष्ठंतु ॥ पशवो वै वामदेव्यं पशुष्वेव प्रतिष्ठां यो ति ष्ठंतु ॥ शान्तिर्वै वाम
देव्यं शान्तावेव प्रतिष्ठां यो ति ष्ठंतु ॥ अतः एतत्कर्मा ऽ ऽ ऽ

वरणा
१

अथ पूर्ण यज्ञोपवीतदानविधिः॥ तत्र कर्त्ता पिता पश्चिमाभिमुखो भू
त्वा पुष्पचन्दनसहितं पूर्ण यज्ञोपवीतवस्त्रान्यादाय ॐ तस्मिन्काले
अग्निसान्निध्ये स्नातः स्नाते ह्यरोगिणि॥ अयं ते अयपतिते स्त्रीवे पि
तानुभ्यं प्रदास्यति॥ इति पठित्वा श्री अमुकी देवी इति पूर्ण यज्ञोप
वीतं वरायप्रदत्वा॥ ततो वरः पठति॥ ॐ अन्नवस्त्र अन्नता वृधः अन्तर

राम
१

घा

स्यास्य अन्नता वृधः॥ घृतश्च्युतो मधुश्च्युतो विराजो नाम कामदुघ्र क्षी
यमाणाः॥ इति पठित्वा वरः शिरसि अक्षतादिकं दत्वा यज्ञोपवीतं परि
दधाति॥ ॥अथ मंगलपठनीयं॥ ॐ आशुः शिशानो वृषभो न
भीमो घनाघनक्षोभणश्चर्षणीनां॥ संक्रंदनो निमिषएकवीरः श
तंसेना अजयत्साकमिन्द्रः॥ संक्रंदनेनानिमिषेण जिष्णुना यत्कारेण

वरण.
२

दुश्च्यवनेन धृष्णुना ॥ तदिन्द्रेण जयन्तस्त्वं युधो नरई पृतनासु दृ
ष्या ॥ सईपृतनासु निवंगिभिर्वशीसँस्वशासमुधईन्द्रोगणानः ॥
सँसृष्टजित्तोमपावाहुशर्धुग्रधन्वाप्रतिहिताभिरस्ता ॥ बृहस्पते
परिदीयारथेनरक्षोहामित्राँ ॥ अपबाधमानः प्रभंजन्सेनाः प्रमृणो
युधाजयन्नस्माकमेध्यविता रथानां ॥ ४ ॥ बलविज्ञायस्थविरः प्र

राम.
१८

वीरः सहस्वान्वाजी सहमानउग्रः ॥ अभिवीरोअभिसत्वासहोजाजै
त्रमिन्द्ररथमातिष्ठगोवित् ॥ गोत्रभिदंगोभिदंवज्रबाहुजयंतमस्म
प्रसरणंनमोजसाईमसुँसजानाअनुवीरःपृथ्वमिन्द्रँसखायोअनु
सँरभध्वं ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिन्द्रः ॥
दुश्च्यवनःपृतनाषाडयुध्योस्माकंसेनाअवतुप्रयत्सु ॥ इन्द्रआसान्वे

अथर्व सं
२

नाद्बृहस्पतिर्दक्षिणा यज्ञः पुरएतु सोमः॥ देवसेनानामभिभंजतीनां
जयंतीनां मरुतो यंत्वग्रं॥ इंद्रस्य विष्णो वरुणस्य राज्ञो ग्राहीतानां
मरुतां शर्ध उग्रं॥ महामनसां भुवनच्यवानां घोषो देवानां जय
तामुदस्थात्॥ उद्धर्षय मघवन्नायुधानि सत्वानां मामकानां मनांसि॥
उद्वृत्रहन्वाजिनां वाजिनानि रथानां जयतां यंतु घोषाः॥१०॥

राम
१९

अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ताजयंतु॥ अस्मा
कं वीरा उत्तरे भवंत्वस्मा॥ उदेवा भवता हवेषु॥ अमीषां चित्तं प्र
तिलोभयंती गृहाणां गच्छतु वशमेहि॥ अभि त्रहि निर्हृत
स्तोकैरेनामिचा लभस्व सचंतां॥ अवसृष्टा परापत शरव्ये ब्रह्म
संशिते गच्छ॥ श्वानं प्रपद्यस्व मामीषां कंचनोच्छिषः॥ प्रेता जयता

छा

शक्रमं. ४ नरईशोवः शर्म्म यच्छतु ॥ उग्रावः संतु बाहवो नाधृष्या यथासथ ॥
अतोषासेना मरुतः परेषां मर्म भेतन ओजसा स्पर्धमानाः ॥ तीक्ष्ण
मभ्यं पवते न पथामी अन्योअन्यं न जानते ॥ यत्र वाणाः संपतं
ति कुमारा विशिखाइव ॥ तन्न इंद्रो बृहस्पतिरदितिः शर्म्म यच्छ
तु विश्वाहा शर्म्म यच्छतु ॥ शर्मा णो नेवर्म्म णा छादयामि सोमस्त्वा राम.
राजामृतेनानुवस्तां उरोर्वरा योवरुणस्ते कृणोतु जयन्तं त्वानुदेवाम २०
दंतु ॥ ॥ ॐ सहस्रशीर्षा पठित्वा ॥ ॐ सहस्रशीर्षा पुरुषः सहस्रा
क्षः सहस्रपात् ॥ स भूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशांगुलं ॥ पुरुष एव
वेदं सर्वं यद्भूतं यच्च भाव्यं ॥ उतामृतत्वस्येशानो यदन्येनातिरोह
ति ॥ एतावानस्य महिमातो ज्यायांश्च पुरुषः ॥ पादोस्य विश्वा भू
त

अष्टमं ५

तानि नरपादस्यामतं दिवि ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभव
त्पुनः ॥ ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥ ततो विराडजा
यत विराजोअधि पुरुषः ॥ स जातो अत्यरिच्यत पश्चाद्भूमिमथो
पुरः ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ॥ पशूंस्ताँश्चक्रे वा
यव्यानारण्यान्ग्राम्याश्च ये ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि

राम. २१

जज्ञिरे ॥ छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वा
अजायन्त ये के चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजा
वयः ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा अयजन्त साध्या
ऋषयश्च ये ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किम
स्यासीत्किं बाहू किमूरू पादा उच्यते ॥ ब्राह्मणोस्य मुखमासीद्

अ० म०
६

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत॥ वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः॥ देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुं॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये॥ तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते॥

सह श्र.
७

राम.
२३

श्रीः १ ॐ नमः श्रीगणेशाय ॥ ॥ देवादित्यकुले जातः ख्यातस्त्रैलोक्यसंस
दि । पद्मनिविदये धीमान् श्रीमान् वीरेश्वरः सुधीः ॥ यस्य मंत्रस्य
यज्ञैकः विनियोगो यथातथं । विलिखेत्तत्रैकः प्रतिकर्म्म कुरा
रिडकां ॥ तत्रादौ विवाहः ॥ जामातृमातृकापूजा भ्युदयिकं कर्तव्यं
॥ ततः कन्यादानं कृतमातृकापूजापूर्वकं वृद्धिश्राद्धं समाप्योत्तरे राम.

गोवन्धनं कारयित्वा अंजलिं विधाय प्रत्यङ्मुखं विलिखेत्तामेव
गामुपलिखेदनेन कन्यादानं ॥ प्रजापतिऋषिरनुष्टुप्छन्दो रहस्यो
योगो हैवतागोपरूपस्थाने विनियोगः ॥ ॐ अहं रुद्रपुत्रवासस्साधे
नुरभवयमेसानः पयः स्वतीदुहाउत्तरामुभरांसमां इति मन्त्रेण ॥
ततः उपविश्य दर्हणीयोजपेत् प्रजापतिऋषिर्विराट्गायत्रीछन्द

पीठः
२

आसनदेवताउपविशादर्हतीयोजपेविनियोगः॥ ॐ इदमहमि
मोपाधोविराजमन्नाद्यासाधिनिष्ठामि इति ततः प्राङ्मुखोऽर्ह
त्युपविशेत्॥ प्रत्यङ्मुखश्चदाताविष्टरमेकंगृहीत्वा॥ ॐ विष्ट
रोविष्टरोविष्टरइतिविस्मेर्न्निवेदिने॥ ॐ विष्टरः प्रतिगृह्यतामि
ति यजमानेनोक्ते ॐ विष्टरं प्रतिगृह्णामीतिवरः प्रतिगृह्य॥ उत्तरा

राम

अविष्टरेउपविशेदनेनमंत्रेण प्रजापतिऋषिरनुष्टुप्छन्दओषधयो
देवताविष्टरस्यासनदानेविनियोगः॥ ॐ याओषधीःसोमोराज्ञीर्बहूः
शतविचक्षणाःतामह्यमस्मिन्नासनेस्थिताःशर्मयच्छन्तु॥ इत्युक्त
त्वा पञ्चविंशतिकुशपत्रकंविष्टरमासनंदद्यात्॥ ततः पूर्ववन्निवे
दितमपरविष्टरंगृहीत्वा प्रजापतिऋषिरनुष्टुप्छन्दओषधयोदे

पीठा
३

वनाविष्टरस्य पादयोरधस्ताद्दानेविनियोगः॥ ॐ आओषधिः सोमरा
ज्ञीर्विशिताः पृथिवीमनु। तासामहमस्मिनु पादयोरधिष्ठाः शर्म्मय
च्छतु ईति पादयोरधस्ताद्भगवंविष्टरं दद्यात्॥ ततो भाजनस्याभ्या
पउपनीय॥ ॐ पाद्याः पाद्याः पाद्याइतिविरम्यैर्निवेदिते ॐ पाद्याः
प्रतिगृह्यतामितिप्रजमानेनोक्ते॥ ॐ पाद्याः प्रतिगृह्णामिपुनःकाव

राम

रःप्रजापतिऋषिर्विराट्गायत्रीछन्दआपोदेवतापादप्रक्षालनोदकप्रे
क्षणेविनियोगः॥ ॐ अतोदेवीः प्रतिपश्यामयापस्ततोमाराधिरागछतु
॥ ईति प्रजमानाञ्जलिस्थाभ्यापःप्रेक्षेत्॥ ततस्ताभ्योरञ्जलिंगृही
त्वा सर्वंपादप्रक्षालयेदनेनमंत्रेण प्रजापतिऋषिर्विराट्गाय
त्रीछन्दःश्रीर्देवतासर्वपादप्रक्षालनेविनियोगः॥ ॐ सर्वंपादम

पा॰ पा॰
४

पशो निजेस्मिन्वा कुश्रियं दधे॰ इति वामपादं प्रक्षालयति वरः॥ ततः
पुनरञ्जलिं गृहीत्वा॰ दक्षिणं पादं प्रक्षालयेदनेन मंत्रेण॰ प्रजापति
ऋषिर्विराड्गायत्री छन्दः श्रीर्देवता दक्षिणपादप्रक्षालने विनियो
गः॥ ॐ दक्षिणं पादमवने निजेजे ग्रस्मिन्वा कुश्रियमावेशयामि॰
इति दक्षिणपादं प्रक्षालयति॥ ततः पुनरुदकाञ्जलिं गृहीत्वा॰ पा

राम॰

दौ प्रक्षालयेदनेन मंत्रेण॰ प्रजापतिऋषिर्विराड्गायत्री छन्दः श्रीर्देवतो
उभयपादप्रक्षालने विनियोगः॥ ॐ पूर्वमन्यमपरमन्य सुभौ पादावने
निजेस्मिन्वा कुस्य घ्रोग्रभयस्यावरुद्धौ॰ इत्युभौ पादौ संहतीकृत्य
प्रक्षालयेत्॥ ततो दूर्वाक्षत फल चन्दन पुष्पार्घ पात्रं शंखं गृहीत्वा॰
ॐ ग्रर्घ्यमर्घ्यमर्घ्यमिति त्रिरन्यैरुक्ते॰ ॐ ग्रर्घ्यः प्रतिगृह्यतामिति

यजमानेनोक्ते ॐ अर्घं प्रतिगृह्णामि तु का वरः॥ प्रजापतिऋ
षिरेकपादिराड्गायत्रीछन्दोऽर्घ्यदेवतार्घ्यप्रतिग्रहणे विनि॰
योगः॥ ॐ अनन्तस्य तार्क्ष्यस्य शिरसि तार्क्ष्ये अग्रासं ईत्यर्घ्यं मादाय॰ लो
कंजलं शिरसि निदध्यात्॥ ततः आचमन्यर्थं तुदकमानीय ॐ
आचमनीयमाचमनीयमाचमनीयमित्यन्येरुक्ते ॐ आचम

नीयं प्रतिगृह्यतामिति यजमानेनोक्ते ॐ आचमनीयं प्रतिगृह्णामी
तिवरः प्रतिगृह्य॥ प्रजापतिऋषिरेकपादा गायत्री छन्दः आचमनी
यदेवता आचमनीयाचमने विनियोगः॥ ॐ यशोऽसि यशो मयि
निधेहि ईत्याचमनं कुर्यात्। ततो दधिमधुघृतं कांस्यपात्रस्थं
कांस्यपात्रान्तरेणाच्छादितं मधुपर्कं गृहीत्वा ॐ मधुपर्को म

वीवा॰
६

धुपर्को मधुर्क इति विरन्ये रुक्ते ॐ मधुपर्कं प्रतिगृह्णामि नि प
मानेनोक्ते ॐ मधुपर्कं प्रतिगृह्णामी पुनस्त्रिवारं प्रतिगृह्य दनेन
मंत्रेण प्रजापतिऋषिर्गायत्री छन्दो मधुपर्को देवता मधुपर्क ग्रह
णे विनियोगः ॐ यशसो यशोसि इत्यनेन मधुपर्कं गृहीत्वा वाम ह
स्ते निधाय अनामिकाङ्गुष्ठाभ्यां मधुपर्कं विमर्द्य दनेन मंत्रेण॰

राम॰

प्रजापतिऋषिर्गायत्री छन्दो मधुपर्को देवता मधुपर्क प्राशने विनि
योगः॥ ॐ यशसो भक्षोसि महसो भक्षोसि श्रीभक्षोसि श्रियं मयि
धेहि अनेन वारत्रयं मधुपर्कं भक्षयेत् प्रति प्राशने मंत्र पाठः॥ चतु
र्थं तु क्षौं ततो मधुपर्कशेषमतं चरदेशे स्थापयेत् ततश्चाचम्य वेदि
मुत्थाय वेद्यां चतुरङ्गुलोच्छ्रितायां वालुकामय्यां उपवेश्य कुशाग्र

छादितमुदकमानेतव्यं॥ तत पूर्वोत्तरप्रदेशः समो वा कुशैः परि
स्तीर्य गोमयोदकेनोपलिप्य प्राङ्मुखउपविष्टः॥ प्राङ्मुखः फलपु
ष्पकुशानामन्यतमं गृहीत्वा अग्निस्थापनपर्यन्तं वामहस्तं भूमावा
रोप्य दक्षिणजानुं भूमावेव पातयित्वा रेखापंचकं कुर्यात्॥
तत्र प्रथमं पूर्वा प्राद्वादशाङ्गुलप्रमाणा पृथिवीदेवताध्येयपीत

वर्णा लेखा लिखितव्या॥ तल्लेखापश्चिमभागे संलग्नाउभयाय
विंशत्यङ्गुलप्रमाणा अग्निदेवताध्येयलोहितवर्णा लेखा लिखि
तव्या॥ तल्लेखासंलग्ना पूर्वायलेखातः षडङ्गुलान्तराला पूर्वगामि
नी प्रादेशप्रमाणा प्रजापतिदेवताध्येयकृष्णवर्णा लेखा लिखि
तव्या॥ तस्याश्चापि षडङ्गुलान्तराला पूर्वगामिनी प्रादेशप्रमाणा इन्द्र

वीवा
८

देवताकाश्येप नीलवर्णलेखालिखितव्या ॥ तस्याश्च पि षडङ्गुला
चरालाप्रर्द्धगामिनी द्वादशाङ्गुलप्रमाणा सोमदेवताकाश्येप शुक्ल
वर्णा लेखालिखितव्या ॥ एवं लेखा पञ्च कं कृत्वा ॥ अनामिकाङ्गु
ष्ठाभ्यां नाभ्यस्य मृदं खनित्वा ऐशान्यां क्षिपेत् ॥ ततो जलेन लेखा
शुद्धां कृत्वा सन्निधापितकांस्यपात्रस्थे तोज्वलत्तृणाग्निरस्यत्य

राम

नेन ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता अग्निसंस्कारे वि
नियोगः ॥ ॐ कव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः
इति ॥ ततोऽग्निं प्रणयेदनेन ॥ प्रजापतिऋषिर्बृहतीछन्दोबृहस्पति
र्देवता अग्निस्थापने विनियोगः ॥ ॐ भूर्भुवः स्वः इत्यग्निमुखमग्निं
प्रणयेत् ॥ ततो वामहस्तं जानु चोत्थाप्य ॥ अञ्जलिं बध्वा ॥ ॐ

इहैवाग्नि नरो जानवेदादेवेभ्यो हव्यं वहतु प्रजानन् इत्यग्नेरुपस्थानं
॥ ततो ग्रोजक नामानमग्निमुपसमाधाय ॥ पातितदक्षिणजानुः प्रा
देशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ अथाग्नेरुत्तरदिश्यु
पविश्य ब्रह्मवरणं ॐ अद्य मत्कर्तव्यपारिग्रहणहोमकर्मणि
कृता कृतावेक्षणरूपब्रह्मकर्मकर्तुमेभिः पुष्पचन्दनताम्बूल

राम.

वासोभिरमुकगोत्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वे त्वामहं वृणे
॥ ॐ वृतोस्मीति प्रतिवचनं ॥ ॐ यथाविहितं कर्म कुरु इति यज
मानेनोक्ते ॥ ॐ करवाणीति प्रतिवचनं ॥ ततो ऽग्नेः पश्चिमे परिक्रम्या
ग्नेर्दक्षिणतः स्थित्वा ब्रह्मासने प्राङ्मुखीं वारिधारां दद्यात् तस्याउ
परि पूर्वाग्रान् कुशान् आस्तीर्य अथ प्रत्यङ्मुख उत्तिष्ठन् वामहस्ता

कुशानामिकाभ्यां ब्रह्मासनाद्दर्भमेकं गृहीत्वा नैऋत्यां क्षिपेदनेन
मन्त्रेण प्रजापतिऋषिर्गायत्रीछन्दोऽग्निर्देवता ब्रह्मासनात्तृणं
निरसने विनियोगः॥ ॐ निरस्तः परावसुः इति तृणं निरस्य उदकमु
पस्पृश्य ब्रह्मोपवेशनेदनेन मन्त्रेण॥ प्रजापतिऋषिरनुष्टुप्छन्दोऽ
ग्निर्देवता ब्रह्मोपवेशने विनियोगः॥ ॐ आवसोः सदने सिद इति वं

ह्मानमुपवेशयेत्॥ ततो ब्रह्मोपरि कुशान् दत्वा॥ अथ ब्राह्मणपक्षे य
दि छत्रमोदकं कमण्डलुमोभरमासङ्गमाश्छिन्नायानभर्गर्भि
पञ्चाशत्कुशपत्रनिर्मितं द्विहस्तिरणवर्तं ग्रन्थिपुतदर्भवटुक
मा ब्रह्माणं कुर्यात् तदावर्णा प्रतिवर्ज्यं सर्वं स्वयमेव यजमानः
कुर्यात् ब्रह्मोपवेशनमन्त्रे सीदेत्युक्तः ब्रह्मयज्ञयज्ञियाम्यां च

दीवा॰
११

देमदा॥ जलेनाभ्युक्ष्य ब्राह्मणं स्पृष्ट्वा जपेत्॥ प्रजापतिऋषि
र्गायत्री छन्दो विष्णुर्देवता जपे विनियोगः॥ ॐ ईदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुले इति जपेत्॥ ॐ नमो विष्णवे इति वा वदेत्॥ कुशचटुकादिपक्षे तं स्पृष्ट्वा यजमान एवं दंजप्त्वा तेनैव पथा परावृत्य स्वस्थानं गच्छेत्॥ ततः दक्षिणादिशि

राम॰

प्रावृत्य सर्वाङ्गं उदकं कलसधारी पुरुषः कश्चिदुदङ्मुखो पविशेत्॥ ना
जाभारणं शीतापहं च होमोपकरणं द्रव्यानि स्थापयेत्॥ ततो व
रः कौतुकागारात् कन्यां हस्ते गृहीत्वा सराडपमागत्य पूर्वाभिमुख
उपविश्य तां तथैवोपवेशयेत्॥ इदानीं वस्त्रपरिधानमित्यस्य शा
खीयं॥ ततः आचम्य कन्यापुरः प्रत्यङ्मुखः कन्यादानमारभेत्॥

पीपा.
१२

शंखस्य दुर्वाक्षतफलतिलजलान्यादाय जामातृदक्षिणक
रोपरि कन्यादक्षिणकरं निधाय तदुपरि दातृकर ॥ ॥ ॐ अ
द्यामुकमासी यामुकपक्षी यामुकतिथौ अमुकगोत्र स्यामुकप्र
वर स्यामुकशर्म्मणः प्रपौत्राय ॥ अमुकगोत्रस्यामुकप्रवर स्यामुक
शर्म्मण पौत्राय ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः

राम.

प्रपौत्राय ॥३॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रीं ॥
अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्रीं ॥ अमुकगोत्र
स्यामुकप्रवरस्यामुकशर्म्मणः पुत्रीं ॥३॥ एवं त्रिदत्त्वा ॥ अ
मुकगोत्रायामुकप्रवरायामुकशर्म्मणे श्रीअमुकप्रवरायानुभ्यं
अमुकगोत्रामुकप्रवरामुकदेवीनाम्नीं त्रिभ्यो कन्यां सालंका

तं प्रजापतिदैवतं स्वर्गकामः पत्नीत्वेनाहं संप्रददे इति दद्यात्॥
ततो वरः स्वस्तीति वदेत्॥ ततः कन्याप्रदः॥ ॐ अद्य कृतैतत्कन्यादा
नप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं अमुकगोत्रायामुकप्रवरा
यामुकशर्मणे गोत्रलग्नयवराय दक्षिणां तुभ्यमहं संप्रददे॥ ततः राम
ॐ स्वस्ति वरो वदेत् गोमिथुनं वा तच्च रुद्रदैवतं दक्षिणां दद्यात्॥

ततो वरः स्वस्तीत्युक्त्वा॥ ॐ कद्रुद्रं कस्माभ्रदात्कामः कामायादात्
कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत्। कामेनात्वा
प्रतिगृह्णामि कामैतत्ते इति पठति॥ ततो नापितो गौर्गौरिति वि
देत्॥ ततो हस्तो नापितं ब्रूयात् प्रजापतिऋषिर्वृहतीछन्दो गौ
र्देवता पूर्वबन्धगोविमोक्षणे विनियोगः॥ ॐ तुच गौ वरुणपाशी

पीवा.
१४

द्विवस्त्रमभिधेहि। तंजघ्नुरस्य वोभयोरुत्सृजगामभुन्दरणानिवि
वनुदकं॥ ततो नापितेन गविमुक्ता मां श्मश्रुलोमनखानि मनुमंत्र
येत्॥ अनेन मंत्रेण प्रजापतिऋषिरनुष्टुप्छन्दो गौर्देवता गोरनु
मंत्रणे विनियोगः॥ ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्या
नाममृतस्य नाभिः॥ प्रनु वोचं चिकितुषे जनाय मा गामनो

राम.

गामदितिं वधिष्ट॥ मम चामुष्य चाश्रीरमुकशर्मणो यजमान
स्य पापमाहन। उत्सृजनन्तरणम्मनुः शमितरणि छिन्धातृ॥ ततो वरः
समाचारादत्रैव वधुं वासो युग्मं परिधापयेदनेन प्रजापतिऋषि
र्जगती छन्दो वस्त्रं देवता अधरीयवस्त्रपरिधाने
जपे विनियोगः॥ ॐ याश्च कृन्तन्तवयं याश्च तन्वतया श्च देवीस्त
त्रौ

ॐ नभिनोनन्थ। नास्त्वादेवीर्ज्जरसे संव्यय॰ स्वायुष्मानीदं परिध
त्तवाससः॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः परिधातारोदेवता उभरीय
वस्त्रपरिधाने विनियोगः॥ ॐ परिधत्त धत्तवाससे नांसतायुषी कृ
ण्वनुदीर्घमायुः शतंचजीवशरदः सवर्चीवस्त्रं निचार्य्यो विभृयासि
जीवन्। ननोवोपिन्नूत्नीं वस्त्रयुगं परिधाय॥ ननः उभयोर्द्वि

रात्रमनं॥ अथयजमानो दुर्वाक्षतफलपुनंवस्त्रयुगवस्त्राभ्यां जन्म
ग्रंथिपातनोदनेन मंत्रेण॥ तत्रवरः मंत्रं पठति प्रजापतिऋषि
स्त्रिष्टुप्छन्दो विश्वेदेवाः देवता सम्मानरिश्वसंधातृ सप्तदेव्योदे
वता जन्मग्रंथिबंधने विनियोगः॥ ॐ समंजंतु विश्वेदेवाः समा
पोहृदयानिनौ। सम्मातरिश्वा संधाता॰ सप्तदेवी दधातुनौ॥ मंत्र

बीवा. पाठश्चायं वरकर्तृकः विन्यास विशेषः पतिं वधूं वेदीं नयन मुमंत्रं
१६ पठेत्॥ प्रजापतिऋषिरनुष्टुप्छन्दः सोमो देवता पन्थः कन्यानयने
जपे विनियोगः॥ ॐ सोमो ददद्गन्धर्वाय गन्धर्वो ददग्नये। रयिं च
पुत्रांश्चादादग्निर्मह्यमथो इमाम्॥ अथाग्नेः पश्चात् पादेन कटं प्रे
रयेत् वधूं पतिः पाठयेत्॥ प्रजापतिऋषिर्द्विपाज्जगती छन्दः पति

राम.

र्देवता कटे पादप्रवर्त्तने विनियोगः॥ ॐ प्रमे पाने यानः पंथाः कल्प
तां शिवाभ्ररिष्टा पाने लोकं गमेयं॥ यदि वधूर्न पठति तदा वरः स्व
यमेव पठेत्॥ ततः प्रजापतिऋषिर्द्विपाज्जगती छन्दः पति र्देव
ता कटं पादप्रवर्त्तने विनियोगः॥ ॐ प्रास्याः पति यानः पन्थाः कल्प
तां शिवाभ्ररिष्टा पति लोकं गम्याः॥ ततः पूर्वस्मिन् कटकभागे

पीवा
७

पानिग्राहस्य नतः कटे उपविश्य पानिः दक्षिणतः वधूं उपविश्य ॥
वर उपविशति वरः कुशाशिकां कुर्यात् ॥ दक्षिणजानुं पातयि
त्वा उपरी कृत दक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भू
मिजपं कुर्यात् ॥ परुषीऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिजपे
विनियोगः ॥ ॐ इदं भूमे भजामहे इदं भद्रं तु मङ्गलं परासव

मे

एम

त्वा धत्वा न्येषां विदनेधनं ॥ रात्रौ धनस्थाने वस्त्रं वदमुच्चारयेत् ॥ ततो द
क्षिणहस्तेन कुशत्रयं गृहीत्वा परिसमूहयेत् ॥ कौत्सऋषिर्जगतीछन्दो
ग्निर्देवता दक्षस्य वदहस्य वदेऽग्नि मारुते शास्त्रे परिसमूहे विनि
योगः ॥ ॐ इमं स्तोमं महते जातवेदसे रथमिव सम्महे मनीषया भद्रा
हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव इत्यग्ने हुभरतः ॥ ॐ

वीवा.
१८

भरामेध्यं कृत्वा मामाहवीं षिनेचितम्नः पर्वणावपं। जीवातवेप्रत
रांसाधयाधियोग्नेःसख्येमारिषामावयन्तव इतिपूर्वतः॥ ॐ इंके
मत्वासमिधंसाधयाधियस्त्वेदेवाहविरदन्त्याहुतं। त्वमादित्यां
श्चावहतांहूरमस्यग्नेसख्येमारिषामावयन्तव इतिदक्षिणतः॥
इतिपरिसमुह्य त्रिराधृत्वंपंचाधृत्वंवाग्नेर्मेत्वान्याछादयन्प्रा

राम.

गग्रैःकुशैस्तरणंकुर्यात्पुरस्ताद्दक्षिणतउत्तरतःपश्चात्परिस्तर
णंकुर्यात्॥ अथदिग्देशमितविशतिध्यात्वामूलमध्याग्रकमेण
धृत्वाकान्एकाग्रान्प्रजापतिंमनसाध्यात्वातूष्णीमग्नौजुहुयात्॥
ततस्तानादेवबर्हिर्षःसाग्रकुशपत्रद्वयंप्रादेशमात्रंकृत्वाकुशमन्त्रोयद्वि
छादनेनमंत्रेण॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दःपवित्रंदेवतेपवित्रछेद

नेविनियोगः॥ ॐ पवित्रे स्थो वैष्णव्यौ॰ ततो द्विरनुमृज्यादनेन म
न्त्रेण॥ प्रजापतिऋषिरुष्णिक्छन्दः पवित्रे देवते पवित्रसम्मार्ज
नेविनियोगः॥ ॐ विष्णोर्मनसा पूते स्थः इति संमृज्याज्यस्थाल्या
मुदगग्रे पवित्रे विधायाज्यमावपेत्॥ ततो ज्वलत्हलाङ्गारोपकनि
ष्ठाभ्यां॰ गृहीतपवित्राभ्यामाज्यमूर्द्ध्नीत्वा सकृत्क्षिपेदनेन॥

राम॰

प्रजापतिऋषिर्गायत्री छन्दः आज्यं देवता आज्योत्पवनेविनियो
गः॥ ॐ देवस्त्वा सविता पुनातु छिद्रेण पवित्रेण वसोः सूर्यस्य र
श्मिभिः स्वाहा॥ द्विस्रुक्स्रुवौ॰ ततः पवित्रेजलेनाभ्युक्ष्य स्रुक्स्रुवौ मध्येऽभि
षेचयेत्॥ ततः आज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायाग्नेरुभय
तो वारत्रयमवतारयेत्॥ इत्याज्यसंस्कारः॥ ततः श्रुवं कुशेन संमृज्य॰

विवा॰ जलेनाभ्युक्ष्य शिरसोऽवनप्पावनारयेत्॥ इति शुद्धतंत्कारः॥ ॥न
२० तोऽभ्रगतदक्षिणजानुः उदकस्थाली मध्ये निधाय॥ प्रजापतिऋ
षिर्गायत्री छन्दो रुद्रदेवतोदकाञ्जलिप्रोक्षणे विनियोगः॥ ॐ
दिनेश्वनुमन्यस्व ईत्यग्रे ईक्षिणतः पूर्वाग्रमञ्जलिधारादधात्
॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रोक्षणे विनियोगः॥ राम॰

ॐ अनुमते अनुमन्यस्व ईति पश्चादुत्तराग्रं॥ प्रजापतिऋषिः सरस्व
तीदेवतोदकाञ्जलिप्रोक्षणे विनियोगः॥ ॐ सरस्वत्यनुमन्यस्व ईत्य
ग्रे रुत्तरतः पूर्वाग्रादधात्॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता दे
वताग्निपर्युक्षणे विनियोगः॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञ
पतिं भगाय। दिव्यो गंधर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः

विवा-
२१

स्वद्भु ईतिहोमी पद्रव्यसहितस्याग्नेर्वीरिधारयावेष्टनं कुर्य्यात् ॥ अ
तोजानुस्थाप्य समिधमेकांफलपुष्पकुशसहितां गृहीत्वा उपरी
कृतदक्षिणहस्तो विरूपाक्षंजपेत् ॥ परमेष्ठी ऋषिर्त्रिगद छन्द
कानाग्निरुद्ररूपोग्निर्देवता विरूपाक्षजपे विनियोगः ॥ ॐ तपश्च
तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च त

राम-

त्वंश्च वाक्च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु ॐ भू
र्भुवस्वरोँ महान्महात्मानं प्रपद्ये विरूपाक्षोसि दन्तोजिह्वस्ते शाय्या
पर्योग्नि रन्तरिक्षे विमितं हिरण्मयं तद्देवानां हृदयान्यस्मये कुंभेश्र
नः सन्निहितानि तानि वलश्च वलसाचरक्षतो प्रमनीश्च निमिष
नूतन्सत्यं यन्नो द्वादशपुत्रा स्तेत्वा सम्वत्सरे सम्वत्सरे कामप्रेरणयेन

विवा॰
२२

प्राजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति नं देवेषु ब्रह्मणोस्मि मनुष्ये
षु ब्रह्मणोस्मि ~~[illegible]~~ रोवेद्रोस्मि रामुपधावमुपत्वाधावामि
जपमं मामाप्रतिजापीर्जुहुनं मामाप्रतिहोषीः कुर्वतं मामाप्र
तिकार्षीस्त्वां प्रपद्ये त्वयाप्रस्तुतं इदं कर्म्म करिष्यामि तन्मेराध्यतां
तन्मेसमृध्यतां तन्मेउपपद्यतां समुद्रोमाविश्वव्यचा ब्रह्मानुजा

राम॰

नानुजुषोमाविश्ववेदा ब्रह्मणः पुत्रोनुजानातु श्वात्रोमाप्रचेतामे
त्रावरुणानुजानातु तस्मै विरूपाक्षाय दत्ताअयं समुद्राय विश्वव्य
चसेनुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पु
त्राय नमः॥ यस्यात्रेकुशमेखलां पत्रकाफलपुष्पं ब्रह्मणे निवेद्य
दक्षिणजानुं पातयित्वा घृताक्तां समिधं हुत्वा होमयेज्जुहुयात्॥ नि

विवा
२२

त्मनैमित्तिके तपश्चेत्यादित्यऋक्॥ भूर्भुवः स्वरोमित्यादिपठेत्॥
ततो व्याहृतिहोमः॥ ॥प्रजापतिऋषिर्गायत्री छन्दोऽग्निर्देवता
व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णिक्छ
न्दोवायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजाप
तिऋषिरनुष्टुप्छन्दः सविता देवता व्याहृतिहोमे विनियोगः॥ राम

ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्बृहती छन्दोबृहस्पतिर्देवता महाव्याहृ
तिहोमे विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ततः एवं व्याहृतिहोमान्तं
कुशाखण्डं कृत्वा दक्षिणतः कटोपविष्टायाः वक्षोपरि गार्हस्थ्य
दक्षिणाग्नेः दक्षिणहस्तेन स्पृशन्त्यां वाङ्मे तन्तुः षडाज्या
हुतिं जुहुयात्॥ प्रजापतिऋषिर्जगती छन्दोऽग्निर्देवता आ

विवा.
२४

ज्याहुतौ विनियोगः॥ ॐ अग्निरेनु प्रथमो देवता अग्निः सो स्मै प्रजां मु
ञ्चतु मृत्युपाशात्। तदयं राजा वरुणो नुमन्यतां यथेयं स्त्री पौत्रम
घ न रोदात् स्वाहा॥ प्रजापतिऋषिरनिजगती छन्दोऽग्न्यादयो
देवता आज्याहुतौ विनियोगः॥ ॐ इमामग्निस्त्वा पतिं गार्हप
त्यः प्रजामस्यै जरदष्टिं कृणोतु। अयं त्वा पत्या जीवतां मह्यमाना

राम.

पौत्रमानन्दमभि वृद्धतामियं स्वाहा॥ प्रजापतिऋषिः शक्वरी छन्दो
विश्वेदेवा देवता आज्याहुतौ विनियोगः॥ ॐ द्यौस्त्वा पृथिवी रक्षतु वायुर्मरुत
अश्विनौ च त्वं धयतु प्रजां सविता अभिरक्षतु त्वा सप्तऋषयः परिधातु त्वा
स्वस्ति भिर्विश्वेदेवा अभिरक्षन्तु पश्चात् स्वाहा॥ प्रजापतिऋषिरनिजग
तीछन्दोऽग्न्यादयो देवता आज्याहुतौ विनियोगः॥ ॐ मा ते गृहे मुनि

विवा
२५

शिघोषउत्थाद्यत्रत्वद्धृदयंसंविसन्तु। मात्वंहृदयंरक्षस्यावधिष्ठा
जीवपत्नीपतिलोकेविराजपश्यंतीप्रजांसुमनस्यमानांस्वाहा॥प्र
जापतिऋषिरुपरिष्टाद्बृहतीछन्दोऽग्न्यादयोदेवताआज्याहुतौवि
नियोगः॥ ॐ यत्प्रजास्वेपौत्रमन्त्रंपाप्मानमुतवाप्रघं। शीर्ष्णःस्रज
मिवोन्मुच्यद्विषद्भ्यःप्रतिमुंचामिपाशंस्वाहा॥प्रजापतिऋषिरुष्णि

राम.

कछन्दोवैवस्वतोदेवताआज्याहुतौविनियोगः॥ ॐ परेतुमृत्योरमृत
मभ्यागाद्वैवस्वतोनोअभयंकृणोतु। परंमृत्योऽनुपरेहिपन्थांयत्र
नोअन्यइतरोदेवयानात्। चक्षुष्मतेतेशृण्वतेब्रवीमिमानःप्रजांरी
रिषोमोतवीरान्स्वाहा॥६॥ ततःप्रजापतिऋषिर्गायत्रीछन्दोग्निर्देव
ताव्याहृतिहोमेविनियोगः॥ ॐ भूःस्वाहा॥प्रजापतिऋषिरुष्णिकछ

विवा-
२६

न्दो वाऽ ईश्वरा व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिर्
गुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजाप
तिऋषिर्वृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥ भूर्भु
वः स्वाहा॥ एवं कृत्वा चानन्तरमग्निसमीप एव दम्पती उत्तिष्ठतः। प
तिश्चवधूं पृष्ठेन परिक्रम्य दक्षिणतः उत्तराभिमुखो भूत्वा तस्याधे

राम-

वञ्जलिं हस्तद्वये गृहीत्वा पतिस्तेनैव पूर्वं देशावस्थितं कं प्राणा
ना मानावा पूर्वोपसादितौ लाजान् गृहीत्वा वधूं दक्षिणपादाग्रेण शि
लापदमाक्रमेत्॥ पतिश्चाश्मानमन्त्रं पठेत्॥ प्रजापतिऋषिरनुष्टुप्छन्दो
ऽश्मा देवताऽश्माक्रमणे विनियोगः॥ ॐ ईममश्मानमारोहाश्मेव
त्वं स्थिरा भव। द्विषन्तमपबाधस्व मा च त्वं द्विषतामधः॥ ततः कं न्या

विवा.
३)

श्वानामानावासकृत्सम्यग्गृहीत्वालाजाञ्जलिं कृत्वोपस्तरणादध
नेवाञ्जलौ निदधात् तं च लाजाञ्जलिं अनाग्निधारि तं वधूरवि
रलहस्ताप्रदीप्तेऽग्नौ जुहुयात् अनेन प्रजापतिऋषिरुपरिष्टाज्योति
ष्मती छन्दोऽग्निर्देवता लाजाहोमे विनियोगः॥ ॐ ईयं नार्युपब्रूतेऽग्नौ
लाजा नावपन्ती॥ दीर्घायुरस्तु मे पतिः शतं वर्षाणि जीवतु ये धन्यां ज्ञातयो

राम.

मम स्वाहा॥ एवं वधूहोमे कृते पतिरनुपृष्ठं प्रत्यागत्याञ्जलिमविच्छि
न्नं वधूमग्निप्रदक्षिणं कारयेत् जपेत् मंत्रेण॥ प्रजापतिऋषिरनु
ष्टुप्छन्दः कन्या देवता कन्यापरिणयने विनियोगः॥ ॐ कन्यालाभिन्नभ्यः
पतिलोकं यतीयमपदीक्षामयस्व। कन्याउनन्वपावयन्धारा उदन्या
ईवातिगाहमाहि द्विषः॥ तथैवानुपृष्ठं पतिः परिक्रम्यावतिष्ठे दक्षिणतः

विवा.
२८

उदकुंभं वधूंजलिं गृहीत्वा ॥ ततः कन्या भ्राता माता वा लाजा गृह
हीत्वा पुनरपि वधूं स्मरन्नमाक्रमयेत् ॥ पतिश्चामुं मंत्रं पठेत् ॥ प्र
जापतिऋषिरनुष्टुब्छन्दोऽश्वइमा देवता अश्वइमा क्रमणे विनियोगः ॥ ॐ
ईममश्मानमारोहाश्मेव त्वं स्थिरा भव । अभिवन्नमपवाधस्व माच
त्वेदिषतामधः ॥ ततः पूर्ववदेवलाजाञ्जलिं उपस्तीर्य घृताभिघा

राम.

रितं वधूलथैव जुहुयात् ॥ प्रजापतिऋषिरुष्णिक्छन्दः पूषादे
वता लाजा होमे विनियोगः ॥ ॐ पूषण्णुदेवं कन्याग्निमयक्षत् । स
ईमान्देवः पूषा प्रेतो मुञ्चतु मा मुत स्वाहा ॥ ततः कृते च होमे पतिर्वधू
मग्निं परिणयेत् स्वपठितमंत्रेण ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः कन्या
देवता कन्यापरिणयने विनियोगः ॥ ॐ कन्यालाभिस्त्रिभ्यः पतिलो

विवा.
२९

कंयतीयमपदीक्षामयष्ट। कंन्याउतन्वयावयन्धाराउदन्पाईवानिगाहे
महिद्विषः॥ततस्तूष्णीमेवानुपृष्टपतिः परिक्रम्य वध्वञ्जलिंगृहीत्वाउ
दङ्मुखोऽवतिष्ठते॥ततोलाजानादायकन्याभ्रातामातावा वधूंस्व
इमानमाक्रमयेत्॥ पतिश्चामुंमन्त्रंपठेत्॥ ॥प्रजापतिऋषिरनुष्टु
प्छन्दोऽग्निरमादेवता अस्मिन्नाक्रमणे विनियोगः॥ ॐ इमममश्मानमारो

राम.

हाश्मेवत्वंस्थिराभव। द्विषन्तमपबाधस्वमाचत्वंद्विषतामधः॥ततः
पूर्ववदेवलाजाञ्जलिंउपकिरन्ति शतमाघारितंवधूरविलग्नेहंसे
नैवजुहुयात्॥प्रजापतिऋषिरुपरिष्टाद्बृहतीछन्दः पूषादेवताला
जाहोमेविनियोगः॥ ॐ पूषणमुदेवंकन्यामग्निमयक्ष्यन्। सईमान्दे
वःपूषाप्रेतोमुञ्चतुमामुतःस्वाहा॥ततोवधूमग्निपरिणयेत्। स्वपठि

विवा॰
३०

तमन्त्रेण॥ प्रजापतिऋषिरनुष्टुप्छन्दः कन्या देवता कन्यापरिणयने
विनियोगः॥ ॐ कन्यालाजपितृभ्यः पतिलोकं गतीयमपदीक्षामयाक
न्याउतन्वयावयन्धारा उदन्याईवातिगाहे महि द्विषः॥ एवमुक्त्वा क्रम
ण लाजहोमपरिणयनानि कृत्वा लाजाशेषमग्नौ तूष्णीं सूर्य्ये
ण प्रक्षिप्य गृहीत्वाञ्जलिकां ऐशानीदिशमाभिमुख्येन नयन सप्तपदा

ण॰

निसप्तभिर्मन्त्रैः पतिर्वधूं क्रमयेत्॥ वधूश्च प्रतिमन्त्रं दक्षिणपादेना
क्रमः सव्येनानुक्रमणं कुर्य्यात्॥ पतिश्च मासमेन दक्षिपादमनुक्रमे
येदिति वधूं प्रतिमन्त्रं ब्रूयात्॥ प्रजापतिऋषिरेकपादिराट्गायत्री छ
न्दोविष्णुर्देवता पादानुक्रमणे विनियोगः॥ ॐ एकमिषे विष्णुस्त्वान
यतु॥ ॐ द्वे ऊर्जे विष्णुस्त्वानयतु॥ ॐ त्रीणि व्रताय विष्णुस्त्वानयतु॥

विवा
३१

ॐ चत्वारि मायोभवाय विष्णुस्त्वानयतु ॥ ॐ पंच पञ्चभ्यो विष्णुस्त्वानयतु ॥
ॐ षड्भ्य ऋतुभ्यो वाय विष्णुस्त्वानयतु ॥ ॐ सप्त सप्तभ्यो होत्रेभ्यो विष्णुस्त्वा
नयतु ॥ एवं सप्तपदानि नीत्वा पांकन्यायो नथैव पतिरनुमंत्रं जपेत् ॥ प्र
जापतिऋषिः पंक्तिछन्दः कन्यादेवता पादानुक्रमणानन्तरमासनो
विनियोगः ॥ ॐ सखा सप्तपदी भव सख्यं ते गमेयं सख्यात्ते मायोषाः स

राम

स्वा ते मायोषा स्वा ॥ ननोवधूं प्रेक्षितुमागतानूजनानुपतिरनुमंत्रयेद
नेन ॥ प्रजापतिऋषिरनुष्टुप्छन्दः स्वाहास्वमानादेवता कन्याप्रेक्षकज
नानुमंत्रणे विनियोगः ॥ ॐ समङ्गलीरियं वधूरिमां समेत पश्यत । सौभा
ग्यमस्यै दत्वायाथास्तं विपरेतन ॥ अथाग्नेः पश्चिमदेशमागत्य सप्तपदी
स्थानमुदककलशधारीकलशाज्जलमादाय पाणिग्राहो मुद्धीनमभि

विवा॰
३२

विश्वानि॰ वरश्च मन्त्रं पठति॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो विश्वेदेवास्त
स्मात विश्वसन्धान्त समुद्देष्टो देवता गृहीतकन्या पारेण पत्युर्ज्जपे वि
नियोगः॥
ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ। संमातरिश्वा संधाता स
मुद्देष्टी दधातु नौ॰ मम नैव पत्युः क्रमं त्रेण वधुमप्यभिषिंचेत्॥ अभि
षिक्तायाश्च॰ दक्षिणे नयारिणा दक्षिणं पारिणं साङ्गुष्ठमुत्तानं गृहित्वा॰

राम॰

पारिणयाहः पारिणग्रहणीयाः षडेता ऋचो जपति॥ प्रजापतिऋषिस्त्रिष्टु
प्छन्दो भगो र्य्यमा सविता पूषन्धिर्देवता गृहीतकन्या पारेण पत्युर्ज्जपे वि
नियोगः॥ ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टि र्य्यथासः। भ
गो र्य्यमा सविता पुरन्धिर्मह्यं त्वा दुर्गार्हपत्याय देवाः॥ प्रजापतिऋ
षिस्त्रिष्टुप्छन्दः कन्या देवता गृहीतकन्या पारेण पत्युर्ज्जपे वि नियोगः॥ ॐ

विवा॰
३१

अघोरचक्षुरपतिघ्नीधिशिवापशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवका
मास्योनाशा नोभव द्विपदेशं चतुष्पदे ॥ प्रजापतिऋषिरनिज्जगती
छन्दः प्रजापतिर्देवता गृहीतकन्यापाणेः पत्युर्ज्जपेविनियोगः ॥ ॐ आनः
प्रजाञ्जनयतु प्रजापतिराजरसाय समनक्तु अर्यमा । अदुर्म्मङ्गलीः प
तिलोकमाविशाशन्नोभव द्विपदेशञ्चतुष्पदे ॥ प्रजापतिऋषिरनुष्टु

राम॰

छन्दः इन्द्रोदेवता गृहीतकन्यापाणेः पत्युर्ज्जपेविनियोगः ॥ ॐ ईमांत्व
मिन्द्रमीढ्वः सुपुत्रां सुभगां कृधि । दशास्यां पुत्रानाधेहि पतिमेकादशं
कृधि ॥ प्रजापतिऋषिरनुष्टुप्छन्दः कन्यादेवता गृहीतकन्यापाणेः प
त्युर्ज्जपेविनियोगः ॥ ॐ सम्राज्ञीश्वशुरे भव सम्राज्ञीश्वश्र्वां भव । नन
दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥ ५ ॥ प्रजापतिऋषिस्त्रिष्टुप्छ

विवा॰
३४

न॰ प्रार्थमानो बृहस्पति र्देवता गृहानकं न्यापातः पत्पुर्ज्ञ पेविनियोग
॥ ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु ॥ मम वाच
मेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यं ॥ ॥ ततः शरावशं
खे स्वर्णप्रेरितसिंदूरदानं वरकर्तृकं ॥ ॐ स्वस्ति न इंद्रो वृद्धश्रवाः
इति पठनीय ॥ ततः सिंदूरदानं ॥ शिरोवगुण्ठनञ्च ॥ ॥ ततः कर्मा

राम॰

न्ते व्याहृतिहोमः ॥ प्रजापतिऋषिर्गायत्रीछन्दोग्निर्देवता व्याहृतिहो
मे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णिक्छन्दोवायुर्देव
ता व्याहृतिहोमे विनियोगः ॥ ॐ भुवः स्वाहा ॥ प्रजापतिऋषिरनुष्टुप्छ
न्दः सविता देवता व्याहृतिहोमे विनियोगः ॥ ॐ स्वः स्वाहा ॥ प्रजापतिऋ
षिर्बृहतीछन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः ॥ ॐ भूर्भु

विवा
३५

वः स्वः स्वाहा ॥ ॥ अथ धुनायदिशाध्यायन होमः कृयते तदा पद्धतिशे
षेअन्वेषव्यः ॥ ततः प्रादेशमितां समिधमग्नौ प्रक्षिप्य पुनः अग्निपर्यु
क्षणादि कुर्य्यात् ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निप
र्युक्षणे विनियोगः ॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ इतिहो

राम

मीयडव्यसहितस्याग्नेर्धारिधारयावेषनं कुर्यात् ॥ प्रजापतिऋषिरदि
तिर्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अदितेऽनुमन्यस्वः इति
दक्षिणतः ॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने वि
नियोगः ॥ ॐ अनुमतेऽन्वमंस्थाः इति पश्चिमतः ॥ प्रजापतिऋषिः स
रस्वती देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ सरस्वत्यनुमंस्थाः इत्यु

विवा
३६

न्नरनः ईति पूर्वविपरीतं वारिधारान्दद्यात्॥ ततस्त्वरणक्रमेण बर्हिरुत्था
प्य जूहिकोवध्वा वामहस्ते कृत्वा॥ प्रजापतिऋषिर्ब्रह्मो देवता दर्भज्ज
ग्रभञ्जने विनियोगः॥ ॐ भ्रुं विहारणाय नुनयः। अनेन दर्भजूहि
को मूलमध्याग्रक्रमेण वारत्रयमाज्यात्कोकुर्यात्॥ ततो जलेनाभ्यु
क्षयाग्रोत्पञ्चेदनेन॥ प्रजापतिऋषिरनुष्टुप्छन्दोरुद्रोदेवता दर्भजूहि

राम

का होमे विनियोगः॥ ॐ यः पशूनामधिपतिरुद्रस्त्रिचरो वृषा। पशून
स्माकं माहिंसीरनदस्तुरुतं नवस्वाहा॥ ॥ततः उत्थाय पूर्णाहुतिः॥
प्रजापतिऋषिर्विराडुष्णिक्छन्दः ईन्द्रो देवता यशस्कामस्य यजनीयप्रयोगे
विनियोगः॥ ॐ पूर्णं होमं यशसे जुहोमि यो मे जुहोति वरमस्मै ददानि।
वरं वृणे यशसा आभिलोके स्वाहा ईति फलपुष्पसहितं पूर्णं स्रुवेण

विवा
३)

कंन्याकरस्थेन पूर्णकुंभं दद्यात्॥ ततः वस्त्रभूषणाहेत्यविच्छिन्नाम
ज्यधारां दद्यात्॥ ततः ॐ अद्य कृतैतद्विवाहहोमकर्मणि कृताकृता
वेक्षकाय ब्रह्मणे पूर्णपात्रमिदं प्रजापतिदैवतं दक्षिणां नमः॥ इति
ब्रह्मणे दक्षिणां दद्यात्॥ ततोऽग्निप्रदक्षिणं नत्वा ब्रह्मोत्था
पनं ग्रंथिविमोकोवा॥ ततश्च वलग्नभस्मनाच्या पुष करणं॥ ॐ

राम

आपुषंजमदग्नेरिति हृदि॥ ॐ कस्यपइत्याप्रुषमिति दक्षिणबाहुमू
ले॥ ॐ अगस्त्यस्य त्याप्रुषमिति वामबाहुमूले॥ ॐ यद्देवानां त्याप्रुषं त
त्रो अस्तु त्याप्रुषमिति शिरसि बिंदुं कुर्यात्॥ वधूपक्षे तन्नो ईत्यस्य
स्थाने तन्ने ईति विशेषः॥ ॥ ततः पात्रस्थं जलमपनीयान्यजलपुष्पा
द्यां पात्रमापूर्य दक्षिणादानं॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ अद्य

विवा॰
३८

कृतैतद्विवाहहोमकर्मप्रतिष्ठार्थं गोमेकांहृदैवतां यथानामगोत्रा
य ब्राह्मणाय दक्षिणां ददामि महं संमुत्सृजेत्॥ ततो वामदेव्यगानं॥
महावैवामदेव्यऋषिर्गायत्री छन्द ईन्द्रो देवता अग्निष्टोमादौ विनियुक्त
ऐहिकाग्निकर्मणि च विनियोगः॥ ॐ कयानश्चित्र आभुवदूती सदा
वृधः सखा कया शचिष्ठया वृता कस्त्वा सत्योमदानां महिष्ठो मत्सद

राम॰

धसः॥ इहा चीदा हृज्ये वसु अभी षुनः सखीनामविता जरितॄणां
शतम्भवास्ऊतये॥ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ प्राजापत्यं
वै वामदेव्यं प्रजापतावेव प्रतिष्ठाय प्रोतिष्ठति। ॐ पशवो वै वामदेव्यं
पशुष्वेव प्रतिष्ठाय प्रोतिष्ठति॥ ॐ अग्निर्वै वामदेव्यं अग्नावेव

विवा॰
३९

प्रतिष्ठापयोनिकम्भि॥ ॐ अनएनाकर्म्माछिद्रमस्तु॥ अस्त्विनिसर्वेषा
मवधारणं॥ ईतिपाणिग्रहणविवाहकर्म्मसमाप्तं॥ ॥ ॥
अथोत्तरविवाहप्रारम्भ॥ ॥

राम॰

श्रीगणेशायनमः॥ ॥अथोत्तरविवाहः॥ ॐ उत्तरस्यांप्रशस्तेदेशेग
त्वा रिचीकनामानमग्निमुपसमाधाय पश्चादग्नेर्वीनद्रुहचर्म्मोप
रिकन्यांनिवेशयेत् ध्रुवदर्शनंयावत्॥ ततःकेनापिनक्षत्रमुदित
मिसुक्लेवरःकुशरिडकांकुर्य्यात्॥ ॥तत्रक्रमः॥ अभ्युक्षणादिक
र्म्मकर्तुः शुद्धभाजनेकृत्वा कुशपद्मादिनमुदकमानेतव्यं ततःप्र

वौ नरपुरोदेशः समोवा कुशैः परिशोध्य कुशैर्हस्तमात्रं परिसमूह्य
॥ गोमयोदकेनोपलिप्य ॥ अग्निस्थापनपर्य्यंतं वामहस्तं भूमावारो
प्य दक्षिणं जानुं भूमावेव पातयित्वा प्राङ्मुखः फलपुष्पकुशानां
मध्यतमं गृहीत्वा रेषापञ्चकं कुर्य्यात् ॥ ॥ तत्र प्रथमं पूर्वाग्राहा
दशाङ्गुलप्रमाणा पृथिवीदेवताकाध्येयपीतवर्णलेखालिखित

व्या ॥ तल्लेखापश्चिमभागसंलग्ना उत्तराग्राएकविंशत्यङ्गुलप्रमा
णा अग्निदेवताकाध्येयलोहितवर्णलेखालिखितव्या ॥ तल्लेखा
संलग्ना पूर्वाग्रलेखातः षडङ्गुलाभरला पूर्वगामिनी प्रादेशप्रमा
णा प्रजापतिदेवताकाध्येयकृष्णवर्णलेखालिखितव्या ॥ तस्याश्च
पि षडङ्गुलाभरला पूर्वगामिनी प्रादेशप्रमाणा ईशदेवताकाध्ये

य॰ नीलवर्णाले खालिखितव्या॥ तस्याश्चपि षडङ्गुलाधराला पूर्वगा
मिनी॰ द्वादशाङ्गुलप्रमाणा॰ सोमदेवता काश्येय॰ शुक्लवर्णाले खालि
खितव्या॥ ५॥ एवंले खापञ्चकं कृत्वा॥ अमुष्योपकनिष्ठाभ्यां
नाभ्यो मृदं खनित्वा ऐशान्यां क्षिपेत्॥ ततो जलेन ले खाभ्युक्षणं
कृत्वा॰ संन्निधापितकांस्यपात्रस्थेइ स्त्रीजलतृणं निरस्यत्पनेन॥

प्रजापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवताश्वग्निसंस्कारे विनियोगः॥ ॐ
ऋग्वादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः॥ ततोग्निं प्र
णयेदनेन॥ ततः प्रजापतिऋषिर्बृहतीछन्दो बृहस्पतिर्देवताश्वग्नि
स्थापने विनियोगः॥ ॐ भूर्भुवः स्वः ईन्धमग्निमुखमग्निं प्रणयेत्॥
ततो वामहस्तं जानुचोत्थाप्य॥ ततोञ्जलिं बध्वा॥ ॐ ईहैवायमितरो जा

विवा॰
४२

नवेदादेवेभ्योहव्यंवहतु प्रजानन् ईत्यग्नेरुपस्थानं॥ ततः पाणिनद
क्षिणजानुः॥ प्रादेशमितौ समिधौ तूष्णीमग्नौ जुहुयात्॥ ततो येषा
ग्निं परिक्रम्याग्नेर्दक्षिणतो वस्त्रायऊर्द्ध्वजानुः प्रत्यङ्मुखस्तिष्ठन
॥ब्रह्मासनेप्राङ्मुखीमाचारिधारादत्वा तस्योपरिप्राङ्मुखानूकु
शानास्तिर्य्य प्रत्यङ्मुखस्तिष्ठन् वामहस्तानामिकाङ्गुष्ठाभ्यांअ॰

राम॰

ब्रह्मासनाद्दर्भमेकं गृहीत्वा नैऋत्यांक्षिपेदनेन॥ प्रजापतिऋषिर्गायत्री
छन्दोऽग्निर्देवताब्रह्मासनानुरणनिरसने विनियोगः॥ ॐ निरस्तः प
रावसुः ईति तृणं निरस्य उदकमुपस्पृश्य ब्रह्मोपवेशयेदनेन मंत्रेण
॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताब्रह्मोपवेशने विनियोगः॥
ॐ ध्रुवसोः सदने सीद ध्रुवस्य पक्षे सीदामीत्यादिकं पूर्ववद्वूह्यं॥ ततो

विवा॰
४३

ब्रह्मोपरि प्रागग्रकुशान् यं दत्वा जलेनाभ्युक्ष्य तदुपरि हस्तं दत्वा जपेत्॥
प्रजापतिऋषिर्गायत्री छन्दो विष्णुर्देवता जपे विनियोगः॥ ॐ ईदं वि
ष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले। ईति जघ्रानेनैव प
धापराधृत्पत्तस्थानं गच्छेत्॥ ततः उपविश्य दक्षिणं जानुं भूमौ पातयि
त्वा उपरीकृतदक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भूमिजपं कु

राम॰

र्य्यात्॥ परमेष्ठी ऋषिरनुष्टुप् छन्दोऽग्निर्देवता भूमिजपे विनियोगः॥
ॐ ईदं भूमे भर्जाम हईदं भईं समङ्गलं। पद्मा सपत्ना बाधस्वा मे षां
विन्दते वसु॥ ततो जानुस्थाप्य दक्षिणहस्तेन कुशत्रयं गृहीत्वा उत्तरा
दितः परि समूहयेत्॥ कौत्स ऋषिर्जगती छन्दोऽग्निर्देवता पृष्ठस्यष
डहस्य षष्ठ॰ श्रह्मग्निमारुते शास्त्रे परि समूहने विनियोगः॥ ॐ ईमंस्तो

विवा॰
४४

मग्न हं नेजानवेदसे रथमिव संमहे नामनी धया। भद्रा हि नः प्रमतिरस्य
संसद्यग्ने सख्ये मा रिषामा वयं तव॰ ईत्यग्ने हुभर नः॥ ॐ भ॰ रामे भ्रं कृण
वामा हविर्विते चित यन्नः पर्ष्ण पर्ष्ण वयं। जीवातवे प्रत रां साधया
धियो ग्ने सख्ये मा रिषामा वयं तव॰ ईति पूर्व्वं नः॥ ॐ शके मत्वा समिधं
साधया धियस्त्वे देवा हविरदन्त्याहुतं। त्वमादित्यां श्राव हतो हृ हृ स्मस्यग्ने

राम॰

सख्ये मा रिषामा वयं तव॰ ईति दक्षिणतः॥ परिसमूह्य॰ वर्हिर्भिरग्नेर्मू
लान्याछादयन् त्रिरावृत्तं पश्चादावृत्तं वा॰ पुरस्ता दक्षिणतः उत्तरतः पश्चा
द्वर्हिस्तरणं कुर्य्यात्॥ अथ पूर्व्वोक्तविंशतिधान्यमूलमध्यायक्रमे
ण घृताक्तान् द्विप्रादेशमितान् प्रजापतिं मनसा ध्यात्वा तूष्णिमग्नौ
जुहुयात्॥ ततस्तूष्णीं देव वर्हिषः स्तायकुशपत्रद्वयं प्रादेशमात्रं कृत्वा॰

विवा॰
४५

कुशामन्त्रजीयद्धिःप्रोक्षणेन॥ प्रजापतिऋषिर्गायत्रीछन्दः पवित्रदेव
ते पवित्रछेदने विनियोगः॥ ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभिः॥ प्रजापतिऋषिः पवित्रे देवते पवित्रसम्मार्जने विनियोगः॥ ॐ
विष्णोर्मनसा पूते स्थः॥ इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे नि-
धायाज्यमावपेत्॥ ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां गृहीतपवि

राम॰

त्राभ्यामाज्यमूर्ध्वीकृत्य त्रिःप्रोक्षणेन॥ प्रजापतिऋषिर्गायत्रीछन्दआज्यं
देवताआज्योत्पवने विनियोगः॥ ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रे
ण वसोः सूर्यस्य रश्मिभिः स्वाहा॥ ततो द्विस्त्रिर्वा ततः पवित्रजलेनाभ्यु
क्ष्य तूष्णिमग्नौ क्षिपेत्॥ ततः आज्यस्थाल्यामुदकेनानुमृज्याग्नेरुत्तरतो
वारत्रयमवतारयेत्॥ इत्याज्यसंस्कारः॥ एवं स्रुवसंस्कारोऽपि॥ ॥ततो

विवा-
४६

भूगतदक्षिणजानुः उदकस्थाली मध्ये कृत्य अग्निः पर्युक्षणं कुर्यात् ॥ प्र
जापतिऋषिरदिति र्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अदितेऽ
नुमन्यस्व ईत्यग्ने र्दक्षिणतः पूर्वीयामञ्जलिधारां दद्यात् ॥ प्रजापतिऋ
षिरनुमति र्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अनुमतेऽनुमन्यस्व
ईति पश्चादुत्तरायां ॥ प्रजापतिऋषिः सरस्वती देवतोदकाञ्जलिप्रसेचने वि

राम-

नियोगः ॥ ॐ सरस्वत्यनुमन्यस्व ईत्यग्ने रुत्तरतः पूर्वीयामञ्जलिधारां द
द्यात् ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनियो
गः ॥ ॐ देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः के
तपूः केतन्नः पुनातु वाचस्पति र्वाचन्नः स्वदतु ईति होमीयद्रव्यसहितस्या
ग्नेर्वारिधारयावेष्टनं कुर्यात् ॥ ततो जानूत्थाप्य समिधमेकां कुशपुष्प

विधा

४

फलसहितां गृहीत्वा उपरीकृतदक्षिणहस्तो विरूपाक्षं जपेत्॥ परमेष्ठी
ऋषिर्निगदछन्दः कालाग्निरुद्ररूपोऽग्निर्देवता विरूपाक्षजपे विनियो
गः॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं च क्रोधश्च त्यागश्च धृतिश्च
धर्मश्च सत्यं च वाक्च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि माम
वतु ॐ भूर्भुवःस्वरों महान्नमात्मानं प्रपद्ये विरूपाक्षोऽसि दण्डाजिनास्त्र

राम.

नेशाय्यापर्णोदलाभिषेकविधिनं हिरण्मयं नेदवानां हृदयान्यस्त्रमयं कु
ञ्जेश्वरः सन्निहितानि तानि बलं भद्रबलं च रक्षतो प्रमनीश्वरविधिवत्
तत्संयत्ने द्वादशपुरश्चरित्वा सम्वत्सरे सम्वत्सरे कामप्रेरणया यज्ञेन याज
यित्वा पुनर्ब्रह्मचर्यमुपयन्नित्यं देवेषु ब्राह्मणोऽस्मि मनुष्येषु ब्राह्मणो
वै ब्राह्मणमुपधावतु पत्वा धावामि जपन्तं मा मा प्रतिजापीर्जुहन्तं मा

मा॰ प्रति होषिः कुर्वंतु॰ मामा प्रतिकार्षीत्वां प्रपद्ये॰ त्वया प्रसूत ईदं कर्म
करिष्यामि॰ तन्मे राध्यतां॰ तन्मे समृध्यतां तन्म उपपद्यतां॰ समुद्रो मा
विश्वव्यचा॰ ब्रह्मा गुजानानु तु थो मा विश्ववेदा ब्रह्मणः पुत्रो गुजाना
नु॰ श्वात्रो मा प्रचेता मेत्रावरुणो गुजानानु॰ तस्मै विरूपाक्षाय॰ दत्ताग्ने
ये॰ समुद्राय विश्वव्यचसे तु थाय॰ विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षा

य॰ ब्रह्मणः पुत्राय नमः॥ ईति पठित्वा कुशामेशान्यां॰ पक्वा॰ फलपुष्पं
ब्रह्मणो निवेद्य॰ पातितदक्षिणजानुः घृताक्तांस्समिधं॰ हुत्वा मन्त्रो क्षि
पेत्॥ ॥ ततो व्याहृतिहोमः॥ प्रजापतिऋषिर्गायत्रीछन्दोग्निर्देवता
व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिर्ब्रह्मिकछन्दो
वायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषि

विवा. ४९

रंगु पुष्पछन्दः सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्र
जापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥
ॐ भूर्भुवः स्वः स्वाहा॥ ततः वह्निरेनैर्मन्त्रैः पतिः षडाज्याहुतिर्जुहुया
त्॥ सुवलग्नमाज्यं वधुशिरसि निदधात्॥ प्रजापतिऋषिरनुष्टुप्छ
न्दः कन्यादेवता भरं विवाहे पाणिग्राहस्याज्यहोमे विनियोगः॥ ॐ लोखा

राम.

सन्धिषु पक्षमस्यावर्त्तेषु च यानि ते। तानि ते पूर्णाहुत्या सर्वाणि शमयाम्य
हं स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः कन्यादेवता भरं विवाहे पाणिग्राह
स्याज्यहोमे विनियोगः॥ ॐ केशेषु यत् पापकमीक्षितं हृदि च यत्।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहं स्वाहा॥ प्रजापतिऋषिरनुष्टु
प्छन्दः कन्यादेवता भरं विवाहे पाणिग्राहस्याज्यहोमे विनियोगः॥ ॐ श्री

विवा॰
५०

ण्डिले यज्ञ पाप कं भाषिते हसिते च यत्। तानि ते पूर्णा कृत्वा सर्वाणि सम
याम्यहं स्वाहा॥ प्रजापति ऋषि रनुष्टुप छन्दः कन्यादेवतो भर विवाहे पा
णिग्राहस्या ज्यहोमे विनियोगः॥ ॐ शीर्षके शिखदन्ते मुखे हस्तयोः पाद
योश्च यत्॥ तानि ते पूर्णा कृत्वा सर्वाणि सम याम्यहं स्वाहा॥ प्रजाप
ति ऋषि रनुष्टुप छन्दः कन्यादेवतो भर विवाहे पाणिग्राहस्या ज्यहोमे वि

राम॰

नियोगः॥ ॐ ऊर्ध्वोरुपस्थे जंघयोः संधाने मुच यानि ते। तानि ते पूर्णा
कृत्वा सर्वाणि सम याम्यहं स्वाहा॥ प्रजापति ऋषि रनुष्टुप छन्दः कन्यादे
वतो भर विवाहे पाणिग्राहस्या ज्यहोमे विनियोगः॥ ॐ यानि कानि च पापा
नी सर्वाङ्गे मुनवा भवन्। पूर्णाहुतिभिराज्यस्य सर्वाणि तानि शीर्ष
मे स्वाहा॥ एवं कृत्वा समीपमेवोत्थाप्य ध्रुवं तारा विशेषं वधुं दर्शयेत्॥

विवा
५१

वधुश्च मंत्रं पठित्वा पश्येत् ॥ साचतां ॥ प्रजापतिऋषिरनुष्टुप्छन्दो
ध्रुवोदेवता ध्रुवदर्शने विनियोगः ॥ ॐ ध्रुवमसि ध्रुवाहं पतिकुलेभू
यासं श्रीअमुकशर्म्मणः श्रीअमुकदेवीशर्म्मदा तत अरुन्धतीं
वधुं दर्शयेत् साचतां पश्येदनेन च पठितमन्त्रेण ॥ प्रजापतिऋषि
रनुष्टुप्छन्दोवधूर्देवता अरुन्धती दर्शने विनियोगः ॥ ॐ अरुन्धत्य

राम

सि ॐ अरुन्धाहमस्मि ईत्यात्मानमुद्दिश्य पठेत् ॥ अथैनामनुमंत्र
येद्वरः पाणिग्राहः प्रजापतिऋषिरनुष्टुप्छन्दः कन्यादेवता कन्या
ऽभिमंत्रणे विनियोगः ॥ ॐ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जग
त् । ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुलेयं अनुमन्त्रिता सती प्रा
प्तेन गोत्रेण पाणिग्राहमभिवादयेत् ॥ अमुकगोत्र अमुकप्रव

विवा
५२

राहं भोऽभिवादये ईति पति ऋमस्कुर्य्यात् अभिवादने वाक्संय
मन्यागः॥ ततः कर्म्मान्ते व्याहृतिहोमः॥ प्रजापति ऋषिर्गायत्री छन्दो
ग्निर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापति ऋषिरु
ष्णिक् छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्र
जापति ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ

राम.

स्वः स्वाहा॥ प्रजापति ऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहो
मे विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ अधुना पदिशाद्याग्नयनहोमः क्रि
यते नदा पद्धतिशेषे अन्वेष्टव्यः॥ ततः प्रादेशमितां समिधं घृताक्तां जा
नुमात्रीमग्नौ क्षिपेत्॥ ततो भूगतदक्षिणजानुः उदकस्थाली मध्ये कृत्वा
पुनरग्निः पर्य्युक्षणादि कुर्य्यात्॥ प्रजापति ऋषिस्त्रिष्टुप् छन्दः सवि

विवा॰ ५३

तादेवता अग्नि पर्युक्षणे विनियोगः॥ ॐ देवसवितः प्रसव यज्ञं प्रसुव
यज्ञपतिं भगाय। दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वा
चं नः स्वदतु॥ इति होमी यद्द्रव्यसहितस्याग्नेर्धारिधारयावेषणं॥ प्र
जापतिऋषिरदितिर्देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अ
दिते अनुमन्यस्वेति दक्षिणतः पूर्वार्धायां॥ प्रजापतिऋषिरनुमतिर्देव

राम॰

तोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अनुमते अन्वमन्यस्वेति पश्चा
दुत्तरार्धायां॥ प्रजापतिऋषिः सरस्वती देवतोदकाञ्जलिप्रसेचने विनियो
गः॥ ॐ सरस्वत्यनुमन्यस्वेति पुनरन्तः पूर्वार्धायां अञ्जलिधारादधानः॥
नत स्तरणक्रमेण बर्हिस्तीर्यकृत्वा प्रदक्षिणं वध्वा वामहस्तोकृ
त्वा॥ प्रजापतिऋषिर्ब्रह्मदेवता दर्भस्तरणे विनियोगः॥ ॐ

ॐ

ॐ३

विवा
२४

श्रद्धेविहानाभ्यनुवयः श्रनेनमूलमध्यायकमेरागवारत्रयमाज्येनाभ्य
नक्तिनतोजलेनाभ्युक्षाज्योजुहुयाद्धनेन॥ प्रजापतिऋषिरनुष्टुप्
छन्दोहुडोदेवतादर्भपूरिकाहोमेविनियोगः॥ ॐ यः पशूनामधिप
तिर्हुडस्तन्निचरोवृषा। पशूनस्माकंमाहिंसीरेनदस्तुहुतंनवस्वा
हा॥ततउत्थायाबध्वादक्षिणहस्तस्पृष्टस्रुवेणफलपुष्पघृतपू

राम.

र्णाहुतिंदद्यात्॥ प्रजापतिऋषिर्त्रिष्टुप्गायत्रीछन्दःईडोदे
वतापशुकामस्यपशुनीपशुप्रयोगेविनियोगः॥ ॐ पूर्णाहोमंपशुसेनु
होमियोस्मैजुहोतिवरमस्मैददाति। वरंवृणेपशुसाभामिलोकेस्वाहा
इतिपूर्णाहुतिंदद्यात्॥ ततः ॐ वसुभ्यःस्वाहेत्यविद्धिनामाज्यधारा
रदद्यात्॥ ततोब्रह्मदक्षिणाकुशत्रयाक्षतजलान्यादाय॥ ॐ अघक्रू

विवा॰
५५

तेनदुष्करविवाहहोमकर्म्मणि कृताकृतावेक्षकायब्रह्मणे पूर्णपात्र
मिदं प्रजापतिदैवतं दक्षिणाभ्रमः॥ ततोग्निप्रदक्षिणं नहस्तं गीत्वाध
स्तरणस्थापनं यथिविधिनोक्तो वा॥ ततः स्रुवेणाभस्मानीय आपुषकर
णं॥ आपुषं जमदग्नेरिति हृदि॥ ॐ कस्यपस्य आपुषमिति दक्षि
णबाहुमूले॥ ॐ अगस्त्यस्य आपुषमिति वामबाहुमूले॥ ॐ यद्देवा

ग्राम॰

नां आपुषमिति कण्ठे॥ ततोग्नस्य आपुषमिति शिरसि बिन्दुं कुर्य्यात्॥
वधूपक्षे ततोईत्यस्य स्थाने ततोईति विशेषः॥ ततः पात्रस्थजलमपनीयाम्र
जलेनपात्रमापूर्य्य तत्र कुशमं प्रक्षिप्य॥ दक्षिणादानं॥ कुशाक्षतज
लान्यादाय॥ ॐ अद्य कृतैतदुष्करविवाहहोमकर्म्मप्रतिष्ठार्थं गामेकां रु
द्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे॥ यथाशक्तिस्ववर्ण

वा ॥ ततो वामदेव्यगानं ॥ ॥ ईत्युत्तरविवाहः समाप्तः ॥ ॥ तत्र प्रभृ
ति दंपति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सहशयीयातां तस्या
श्चरात्रौ वरोऽविप्यमन्त्रमभिरनुमन्त्रे भुञ्जीत ॥ प्रजापतिऋषिरनुष्टुप्छ
न्दश्चन्द्रदेवताश्चन्द्रानुमन्त्रणे विनियोगः ॥ ॐ चन्द्रं प्राशेन मनिना प्राण
सूत्रेण पृष्टिना । वध्नामि सत्यग्रन्थिना मनश्च हृदयञ्च ते ॥ प्रजापतिऋ

षिरनुष्टुप्छन्दः प्रार्थ्यमानदेवतादम्पत्योर्हृदयैक्यप्रार्थने विनियोगः ॥
ॐ यदेतद्धृदयं तव तदस्तु हृदयं मम । यदिदं हृदयं मम तदस्तु हृदयं तव ॥ प्रजा
पतिऋषिर्बृहतीगायत्रीछन्दोश्चन्द्रदेवताश्चन्द्रस्तुतौ विनियोगः ॥ ॐ चन्द्रं
प्राणस्य वद्धिं शस्तेन वध्नामि त्वा सो । एवमभिमन्त्र्य प्राणायस्वाहेत्यादि
ना भुक्त्वा शेषमन्नं वर्जयेद्घातू ॥ इति मन्त्रानुमन्त्रितान्नभोजनं ॥ ॥

विना.
५७

अथ चतुर्थी कर्म्म॥ ॥तत्र चतुर्थे अहनि नैलोद्वर्तनादि कृत्वा युगकाष्ठ
उपविश्य स्नात्वा शुचिवस्त्रैः परिधाय आचम्य प्राङ्मुखौ वधूवरावुपविशतः
॥तत्र कुशाण्डिकां कुर्य्यात्॥ तत्र क्रमः॥ अभ्युक्षणादि कर्म्म कर्तुं कुशाग्रद्वा
दिनमुदकमानेतव्यं पूर्वोत्तरपुरो देशः समो वा परिशोध्यः कुशैर्हस्तमा
त्रं परिसमुह्य गोमयोदकेनोपलिप्य अग्निस्थापनपर्य्यन्तं वा महत्संभ्र

राम.

मावारोप्य दक्षिणजानुं भूमावेव पातयित्वा फलपुष्पकुशानामन्यत
मं गृहीत्वा रेखापंचकं कुर्य्यात्॥ तत्र प्रथमं पूर्वायाद्वादशाङ्गुलप्रमाणा
पृथिवीदेवताकाध्येयपीतवर्णलेखा लिखितव्या॥ तल्लेखापश्चिमभाग
संलग्नाऽनतायाष्टकविंशत्यङ्गुलप्रमाणा अग्निदेवताकाध्येयलोहितव
र्णलेखा लिखितव्या॥ तल्लेखासंलग्ना पूर्वायलेखातः षडङ्गुलान्तराला

पूर्व्वगामिनी प्रादेशप्रमाणा प्रजापतिदेवताकाध्येयकृष्णवर्णा लेखा लि
खितव्या ॥ तस्याश्चापि षडङ्गुलाभरालापूर्व्वगामिनी प्रादेशप्रमाणा ईन्द्र
देवताकाध्येया नीलवर्णा लेखा लिखितव्या ॥ तस्याश्चापि षडङ्गुलाभरा
लापूर्व्वगामिनी द्वादशाङ्गुलप्रमाणा सोमदेवताकाध्येया शुक्लवर्णा लेखा
लिखितव्या ॥ एवं लेखापञ्चकं कृत्वा अनामिकाङ्गुष्ठाभ्यामभ्यस्य राम

दक्षिणहस्तेशान्यामरणिमात्रे देक्षिपेत् ॥ ततो जलेन लेखाभ्युक्षणं कृ
त्वा सन्निधापितकांस्यभाजनस्थेग्नौ ज्वलन्तृणं निरस्यत्यनेन ॥ प्रजाप
तिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताऽग्निसंस्कारे विनियोगः ॥ ॐ ऋष्याद
मग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ॥ ततोग्निं प्रणयेदनेन ॥ ततः
प्रजापतिऋषिर्बृहतीछन्दो बृहस्पतिर्देवताऽग्निस्थापने विनियोगः ॥

विवा-
पूर्ण

ॐ भूर्भुवः स्वः ईत्यभिमुखमग्निं प्रणयेत्॥ ततो वामहस्तं जानुचोत्था
प्याञ्जलिं बध्वा॥ अग्नेरुपस्थानं कुर्यात्॥ ॐ ईहैवायमितरो जातवेदा
देवेभ्यो हव्यं वहतु प्रजानन् ईत्यग्नेरुपस्थानं॥ ततः पातितदक्षिणजानुः
प्रादेशमितां समिधं घृताक्तां जुहोमन्त्रेणाग्नौ क्षिपेत्॥ ततो ग्रेनाग्निं परि
क्रम्याग्नेर्दक्षिणतऊर्द्ध्वजानुः प्रत्यङ्मुखस्तिष्ठन्॥ ब्रह्मासने प्राङ्मुखो

राम.

म्बारिधारादत्वा तस्याउपरि प्रागग्रान् कुशान् आस्तीर्य प्रत्यङ्मुखस्तिष्ठन्
वामहस्तानामिकाङ्गुष्ठाभ्यां ब्रह्मासनाद्दर्भमेकं गृहीत्वा नैऋत्यां क्षिपे
दनेन॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता ब्रह्मासनात्तृणनिरस
ने विनियोगः॥ ॐ निरस्तः परावसुः ईति तृणं निरस्य उदकमुपस्पृश्य॥
ब्रह्मासनमुपवेशयेदनेन॥ प्रजापतिऋषिरनुष्टुप्छन्दोऽग्निर्देवता ब्रह्मा

विवा.
६०

पवेशने विनियोगः॥ ॐ श्रावस्तीः सदने सीद ईति ब्रह्माणमुपवेशये
त्॥ श्रीब्रह्मणपक्षे सीदामीत्यादिकमन्यत्तो ह्यं॥ ततो ब्रह्मोपरि कुशाना
स्तीर्य्य जलेनाभ्युक्ष्य ब्रह्माणं स्पृष्ट्वा जपेत्॥ प्रजापतिऋषिर्गाय
त्री छन्दोविष्णुर्देवता जपे विनियोगः॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा नि
दधे पदं। समूढमस्य पांसुले। ईति जप्त्वा नैव पथा परावृत्य स्वस्था

राम.

नं गच्छेत्॥ ततउपविश्य॥ दक्षिणजानुं पातयित्वा उपरि कृतदक्षिणहस्तः
करद्वयमधोमुखं भूमावारोप्य भूमिं जपेत्कुर्य्यात्॥ परमेष्ठिऋषिर्ज
गतीछन्दोग्निर्देवता भूमिजपे विनियोगः॥ ॐ इदं भूमेर्भ्वजामहइदं भद्रं स
मङ्गलं। परासपत्नान्बाधस्वान्येषां विन्देत धनं॥ रात्रौ धनस्थाने वसुदाव
प्रयोगः॥ ततो जानुस्थाप्य दक्षिणहस्तेन कुशत्रयं गृहीत्वा अग्नेरुत्तरा

विवा
६१

दिनः प्रदक्षिणाक्रमेण परिसमूहयेत्॥ कोत्सऋषिर्जगती छन्दोग्निर्दे
वता ऽष्टस्वष्टस्वष्टेष्वहन्यग्निमाहुतेः शत्रुपरिसमूहने विनियोगः॥
ॐ ईमंस्तोममर्हतेजातवेदसे रथमिव सम्महेमामनीषया। भद्रा हिनः प्र
मतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ईत्यग्ने हुतहतः॥ ॐ भरामे
ध्मं कृणवामा हविषा विधेम चितयन्तः पर्वणा पर्वणा वयं। जीवातवे प्रतरां सा

राम

धयाधि पोग्ने सख्ये मा रिषामा वयं तव ईति पूर्वतः॥ ॐ शं केमन्वास
मिध साधयाधि यत्त्वे देवा हविर्दन्मा हुतं। त्वमादित्यां श्रावहतां हुक्त्म
स्यग्ने सख्ये मा रिषामा वयं तव ईति दक्षिणतः॥ एवं प्रदक्षिणाक्रमेण प
रिसमूह्य बर्हिर्भिरग्नेर्मूलान्याच्छादयेत् त्रिणवृत्तं पञ्चावृत्तं वा पुरस्ता
द्दक्षिणतः उत्तरतः पश्चात् स्तरणं कुर्यात्॥ अथ पूर्वोक्तविंशतिध्मान्

विवा
६२

मूलमध्याग्रकमेणघृतानां प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहु
यात्॥ततस्तूतादेव बर्हिषः स्वाग्रकुशपत्रद्वयं गृहीत्वा प्रादेशमात्रं कृत्वा
कुशमन्त्रौ यद्विच्छोदनेन॥प्रजापतिऋषिः पवित्रं देवते पवित्रच्छेदने
विनियोगः॥ॐ पवित्रे स्थो वैष्णव्यौ॥ततोद्भिरनुमृज्योदनेन॥प्रजापति
ऋषिः पवित्रं देवते पवित्रसम्मार्जने विनियोगः॥ॐ विष्णोर्मनसा पूते

राम.

स्थः॥ततो आज्यस्थाल्यामुदगग्रे पवित्रे निधाय आज्यमावपेत्॥ततो मन्त्र
हस्तादुत्थोपकनिष्ठाभ्यां गृहीते पवित्राभ्यामाज्यमूर्द्ध्वीकृत्य सकृत्सि
पेदनेन॥प्रजापतिऋषिराज्यदेवता आज्योत्पवने विनियोगः॥ॐ देव
स्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः स्वाहा॥त
तो द्विःनुष्णीं क्षिपेत्॥ततः पवित्रे जले नाभ्युक्ष्य तूष्णीमग्नौ क्षिपेत्॥ततः

विवा.
६३

आज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायाग्नेरुभयतो वारत्रयमव
तारयेत् ईत्याज्यसंस्कारः॥ एवं स्रुवसंस्कारोपि॥ ॥ ततो भूगतदक्षि
णजानुरुदकस्थालीमध्ये कृत्वाग्निः पर्युक्षणं कुर्यात्॥ प्रजापतिऋषि
रदितिर्देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अदितेऽनुमन्यस्व ईत्य
ग्नेर्दक्षिणतः पूर्वाग्रा॥ प्रजापतिऋषिरनु मतिर्देवतोदकाञ्जलि

एम.

प्रसेचने विनियोगः॥ ॐ अनुमते अनुमन्यस्व ईति पश्चादुत्तराग्रा॥ प्रजापति
ऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ सरस्वत्यनुमन्य
स्व ईत्यग्नेरुत्तरतः पूर्वाग्रामञ्जलिधारां दद्यात्॥ प्रजापतिऋषिस्त्रिष्टु
प्छन्दः सविता देवताग्निपर्युक्षणे विनियोगः॥ ॐ देवसवितः प्रसुव यज्ञं
प्रसुव यज्ञपतिं भगाय। दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पत

विवा.
६४

निर्वीचन्नः स्वदनु ईनिहोमीयद्रव्यसहितस्याग्नेर्धारिधारयावेशनं॥ ततो
जानुस्थाप्य समिधमेकां फलपुष्पकुशासहितां गृहीत्वा उपरीकृतदृष्टि
एकहस्तो विरूपाक्षं जपेत्॥ परमेष्ठी ऋषिर्निगदछन्दः कालाग्निरुद्ररूपो
ग्निर्देवता विरूपाक्षजपे विनियोगः॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च स
त्यञ्चा क्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्यञ्च वाक् मनश्चात्मा च

राम.

ब्रह्मचर्यानि प्रपद्ये तानि मा मवन्तु ॐ भूर्भुवः स्वरों महान्तमात्मानं प्र
पद्ये विरूपाक्षोसि दन्तांजिस्तस्मेते शाम्यापर्णो गृहाणारिक्षे विमितं हिर
ण्मयं तदेवानां हृदयान्यपस्मये कुम्भे अग्नः सन्निहितानि तानि वल भञ्च
वलसा च रक्षतो प्रमनीश्च निमिषन्नन्तस्तं यन्ने द्वादशा पुत्रास्तिस्त्रास्त्वस्त
रेकामप्रेरा यज्ञेनयाजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्नित्वं देवेषु ब्राह्मणा
स्संवत्सरे।

विवा.
६५

त्वं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावन्नुपत्वाधावामि जपन्तं मा
मा प्रति जापीर्जुहुन्तं मा मा प्रति होषीः कुर्वन्तं मा मा प्रति कार्षीस्त्वां प्र
पद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां
तन्मे उपपद्यतां समुद्रो मा विश्वव्यचा ब्रह्मा नुजानातु तथो मा विश्ववे
दा ब्रह्मणः पुत्रो नुजानातु श्वात्रो मा प्रचेता मैत्रावरुणो नुजानातु तत्

राम.

तस्मै विरूपाक्षाय दन्ताञ्जयेत समुद्राय विश्वव्यचसे तथाय विश्ववेदसे श्वा
त्राय प्रचेतसे तस्मै त्वाक्षाय ब्रह्मणः पुत्राय नमः॥ इति मंत्रेण कुशमैरण्मां
सपक्वफलपुष्पं ब्रह्मणे निवेद्य दक्षिणं जानुपातयित्वा घृताक्तांस्तिल
धनूंषीमग्नौ क्षिपेत्॥ ॥ततो व्याहृतिहोमः॥ प्रजापतिऋषिरुष्णिक्छ
न्दो वायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिर
प्रजापतिऋषिर्गायत्रीछन्दोग्निर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥२

विवा॰
६६

उष्णिक्छन्दः सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजा
पतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥ ॐ भू
र्भुवः स्वः स्वाहा॥ ॥ततः व्याहृतिहोमान्तं कुशशिष्टं कृत्वा॰ इन्द्रियः प
ञ्चभिर्मन्त्रैः पञ्चाहुतिर्जुहुयात्॥ स्फ्यलग्नमाज्यं जलपात्रे पातयेत्॥
प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता चतुर्थी होमकर्मणि विनियो

राम॰

गः॥ ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि। ब्राह्मणस्त्वा नाथ
कामउपधावामि यास्याः पापीलक्ष्मीर्ललामस्याः अपजहि स्वाहा॥ प्रजाप
तिऋषिस्त्रिष्टुप्छन्दो वायुर्देवता चतुर्थी होमकर्मणि विनियोगः॥ ॐ
वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि। ब्राह्मणस्त्वा नाथकामउ
पधावामि यास्या पतिघ्नी तनूर्ललामस्याः अपजहि स्वाहा॥ प्रजापतिऋ

विवा.
६)

त्रिष्टुप्छन्दश्चन्द्रो देवता चतुर्थी होमकर्मणि विनियोगः॥ ॐ चन्द्र
प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि। ब्राह्मणस्त्वा नाथकाम उपधा
वामि प्रास्याः प्रजायां नूत्तामस्या अपजहि स्वाहा॥ प्रजापतिऋषिः सू
र्यो देवता चतुर्थी होमकर्मणि विनियोगः॥ ॐ सूर्य प्रायश्चित्ते त्वं देवानां
प्रायश्चित्तिरसि। ब्राह्मणस्त्वा नाथकाम उपधावामि प्रास्याः प्रपतव्याः

राम.

नूत्तामस्या अपजहि स्वाहा॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्वायु
श्चतुस्सूर्यो देवता चतुर्थी होमकर्मणि विनियोगः॥ ॐ अग्निवायुचन्द्र
सूर्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयः स्थ। ब्राह्मणो वो नाथका
म उपधावामि प्रास्याः पापीलक्ष्मीर्व्या पानि ध्रौ र्या अप्रजा या अपसव्या ता
अस्या अपहत स्वाहा॥ अथैनेन घृतमिश्रोदकेन वर्धं सकेशान स्वामश्रुरूप

